No. ४३६४

Title मीमांसा न्याय प्रकाश:

Author श्री आपदेव:

Extent ५० Age ९

Subject पू० मीमांसा

(मीमांसा न्यायप्रकाशः)

~~५२५४~~

५२५४

देवी नामांतरं न्याय प्रकाश:

८३ १

ॐ श्रीगणेशाय नमः यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयं प्राप्यते तमहं वंदे गोविंदं भक्तवत्सलं १ अनंतगुणसं
पन्नमनंतभजनप्रियं अनंतरूपिणं वंदे यज्ञमानंदरूपिणं २ अथ खलु परमकारुणिकेन भगवता जैमिनिना ऋषिणा
अथातो धर्मजिज्ञासेत्यादिना द्वादशलक्षण्या यो धर्मो विचारितः तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो ध
र्मः यथा यागादिः स हि यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीयते तथा हि यजेतेत्यत्रांशद्वयं यजि
धातुः प्रत्ययश्च तत्र प्रत्ययेऽप्यंशद्वयं आख्यातत्वं लिङ्त्वं च आख्यातत्वं च दशसु लकारेषु विद्यते लिङ्त्वं
पुनः केवले लिङ्येव तत्राख्यातलिङ्त्वाभ्यां भावनैवोच्यते भावना नाम भवितुर्भवनानुकूलो भावकव्यापारवि
शेषः सा च द्विविधा शाब्दी भावना आर्थी भावना चेति तत्र पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शाब्दी भावना
सा च लिङ्त्वांशेनोच्यते लिङ्श्रवणे अयं मां प्रवर्तयतीति मत्प्रवृत्त्यनुकूलव्यापारवानयमिति नियमेन प्रतीय
मानत्वात् यद्यस्मात्प्रतीयते तत्तस्य वाच्यं यथा गोशब्दस्य गोत्वं स च प्रवृत्त्यनुकूलो व्यापारविशेषो लौकिके पुरु
षनिष्ठोऽभिप्रायविशेषः वेदे तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव न हि वेदः पुरुषनिर्मितः वेदस्याध्यय
नं सर्वं गुर्वध्ययनपूर्वकं वेदाध्ययनसामान्यादधुनाध्ययनवदित्यादिना वेदापौरुषेयत्वस्य साधितत्वात्
यः कल्पः स कल्पपूर्वः इति न्यायेन संसारस्यानादित्वादीश्वरस्य च सर्वज्ञत्वादीश्वरो गतकल्पीयं वेदमस्मिन्कल्पे

ज्ञापकत्वेन २

सन्निकर्षस्येव रूपादिज्ञाने सन्निकर्षाकांक्षारूपज्ञानस्येव लिङादिज्ञानात्प्राक् शाब्द्यर्थभावनाया अभावप्रसंगा
त् किंतु भावनाभाव्यनिर्वर्तकत्वेन ५

स्यत्वोपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थस्योपलभ्यमानत्वकल्पनानुपपत्तेश्च तत्स्वरूपाभा
वात् लिङादिशब्दनिष्ठैव साध्यान्वयशाब्दी भावनेति व्यपदिशति सा च शाब्दी भावनांशत्रयमपेक्षते साध्यं सा
धनमितिकर्तव्यतां च तत्र साध्याकांक्षायां वक्ष्यमाणांशत्रयोपेतार्थी भावना साध्यत्वेन संबध्यते एकप्रत्यय
गम्यत्वेन समानाभिधानश्रुतेः यद्यपि संख्यादीनामपि एकप्रत्ययगम्यत्वं समानं तथापि अयोग्यत्वान्न ते
षां भाव्यत्वेनान्वयः करणाकांक्षायां लिङादिज्ञानं करणत्वेन संबध्यते न च स्वकरणत्वेन भावनोत्पादकत्वेन
लिङादिज्ञानं दिशाब्दभावनाभाव्यार्थभावनानिर्वर्तकमिति कण्ठरवेणोक्तेदं अतोऽपि सन्निकर्षस्येव रूपादिज्ञानं सन्नि
कर्षाकांक्षारूपज्ञानस्येव लिङादिज्ञानात्प्राक् शाब्द्यर्थभावनाया अभावप्रसंगात् किंतु भावनाभाव्यनिर्वर्तक
त्वेन लिङादिज्ञानस्य करणत्वेनान्वयः इतिकर्तव्यताकांक्षायां प्राशस्त्यज्ञानं इतिकर्तव्यतात्वेन संबध्यते तच्च
प्राशस्त्यज्ञानं वायुर्वै क्षेपिष्ठा देवतेत्याद्यर्थवादैर्जन्यते तेऽर्थवादाः स्वार्थप्रतिपादने प्रयोजनमलभमाना ल
क्षणया क्रतोः प्राशस्त्यं प्रतिपादयन्ति स्वार्थमात्रपरत्वे आनर्थक्यप्रसंगात् न चैवमापत्तिः अध्ययनवि
ध्युपात्तत्वेनानर्थक्यानुपपत्तेः तथा हि स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः सकलस्य वेदस्याध्ययनकर्तव्य
तां बोधयन् सर्वो वेदः प्रयोजनवदर्थपर्यवसायी इति सूचयति निरर्थकस्याध्ययनानुपपत्तेः स च वेदः वि

मी २

धिमंत्रनामधेयनिषेधार्थवादात्मकः तत्र विधिः प्रयोजनवदर्थविधानेनार्थवान् स चाप्राप्तमर्थं विधत्ते यथाग्नि
होत्रं जुहुयात्स्वर्गकाम इति विधिरप्राप्तं प्रयोजनवद्धोमं विधत्ते अग्निहोत्रहोमेन स्वर्गं भावयेदिति यत्र तु कर्म
प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते यथा दध्ना जुहुयादित्यत्र होमस्याग्निहोत्रं जुहोतीत्यनेन
प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधाने दध्ना होमं भावयेदिति यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते तदुक्तं
न चेदन्येन शिष्टा इति शिष्टा उपदिष्टा इत्यर्थः यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्ट
यागविधाने सोमवता यागेनेष्टं भावयेदिति न चोभयविधाने वाक्यभेदः विशिष्टस्यैकत्वात् विशिष्टविधौ
च मत्वर्थलक्षणा यथा सोमपदेन मत्वर्थो लक्ष्यते सोमवतेति न हि मत्वर्थलक्षणां विना सोमस्यान्वयः संभ
वति यदि तावत्सोमयागयोरैकरूप्येण भावनायां करणत्वेनैवान्वयः सोमेन यागेनेष्टं भावयेदिति तत
उभयविधाने वाक्यभेदः सोमस्य यागवत्फलभावनायां करणत्वेन प्रत्यक्षविरोधश्च न हि सोमो यागवदिष्टम्
इति प्राधान्यापत्तिश्च यागार्थत्वानुपपत्तिश्च यागे द्रव्यानुपपत्तिश्च प्रत्ययवाच्यफलभावनायाः समानप
दोपात्तेन यागेन करणाकांक्षाया निवृत्तत्वेन भिन्नपदोपात्तस्य सोमस्य करणत्वेनान्वयानुपपत्तिश्च स्यात् ॥
यदि चैवं यधिकरणेनान्वयः तत्र न तावद्यागेन सोमस्यान्वयः समानपदोपात्तत्वात् प्रत्ययवाच्यफल

भावनाकरणत्वेनान्वितस्य यागस्य सोमकर्मभावनान्वयानुपपत्तेः यागस्य सोमार्थत्वापातस्तन्नैव संप
त्तेः अदृष्टद्वयापत्तेः नहि यागस्य सोमार्थत्वं दृष्टद्वारेण संभवति व्रीहिष्विव यागेन सोमे कस्य
चिद्दृष्टस्याजननात् अतस्तेन तावत्सोमे किंचिददृष्टं जननीयं प्रोक्षणेनेव व्रीहिषु तथा च यागस्य सोमा
र्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वक्तव्यः करणत्वं च भावनाभाव्यनिर्वर्तकत्वेन तेन
च सोमोऽदृष्टमन्तरेण फलं जनयितुं समर्थः ग्रहैर्जुहोतीति वाक्यविहितहोमेन तस्य भस्मीभावात् अतो
ऽदृष्टद्वयापातान्न यागस्य सोमार्थत्वमिति न यागेन सोमं भावयेदित्यन्वयः संभवति करणत्वेनोपस्थित
स्य सोमस्य साध्यत्वेनान्वयानुपपत्तेः अथ सोमेन यागं भावयेदित्यन्वयस्तत्र यद्यपि सोमस्य यागा
र्थत्वात् यागनिर्वृत्तिर्दृष्टमेव प्रयोजनं लभ्यते इति नादृष्टद्वयापत्तिः नापि करणत्वेनोपस्थितस्य सो
मस्य साध्यत्वान्वयानुपपत्तिः करणत्वेनैवान्वयात् तथाप्यप्राप्तत्वाद्भावनाकरणत्वेनोपस्थितस्य या
गस्य साध्यत्वेनान्वयानुपपत्तिस्तदवस्थैव ननु यजेतेत्यत्र यागस्य न करणत्वेन नापि साध्यत्वेनोपस्थि
तिः तद्वाचकतृतीयाद्यभावात् किंतु भावनायां यागसंबंधमात्रं प्रतीयते यागस्य च भावनासंबंधः कर
णत्वेन साध्यत्वेन वा संभवति तत्र करणत्वांशमादाय फलसंबंधः साध्यतांशमादाय गुणकर्मसंबंधश्च

स्यादिति चेन्मैवं यद्यपि भावनया यागस्यांशत्वं यस्मात्प्रतीयते तथापि करणत्वेनोपस्थितिरस्यायां न साध्यत्वे
नोपस्थितिः संभवति विरोधान्न द्रव्यस्य यागेन स्वर्गं भावयेदिति करणत्वेनान्वये सति पश्चात्सोमेन यागं भाव
येदिति साध्यत्वेनान्वयो वक्तव्यः तत्र च वाक्यभेदः नच प्रत्ययाभिहितभावनास्वरूपे यागस्वरूपमात्रम
न्वेतीति वक्तुं युक्तं कारका[illegible]णामेव क्रियान्वयात् तस्मिन्हि सोमस्य तद्यागसामानाधिकरण्येन वैयधिकर
ण्येन वान्वयः संभवति ननु यजेतेत्यत्र प्रत्ययाभिहितभावनायाः करणांशे तावद्यागः करणत्वेना
न्वेति न त्वेतिकर्तव्यतांशे तावत्सोमस्येतिकर्तव्यतात्वेन भावनायामेवान्वयोऽस्तु किं मत्वर्थलक्षणयेति
चेन्न सोमेनेति तृतीयया करणत्ववाचिन्या सोमस्येतिकर्तव्यतात्वानभिधानात् तत्र यदि इतिकर्तव्यतात्वे
लक्षणोच्यते ततो वरं सोमपदे एव प्रकृतिभूते मत्वर्थलक्षणा गुणत्वन्यायकल्पनेति न्यायात् अथ
वेदो वा प्रायदर्शनादित्यत्र करणकाक्षाजातविरोधित्वन्यायेनेतिप्रत्ययएव लक्षणेति चेत्तथापि सोमस्ये
तिकर्तव्यतात्वेनान्वयानुपपत्तिः सिद्धस्य वस्तुन इतिकर्तव्यतात्वाभावात् क्रियाया एव इतिकर्तव्यता
त्वात् द्रव्यस्य केवलमंगत्वात् अत एव इतिकर्तव्यतात्वाभावाद्द्रव्यस्य प्रकरणाग्रहणं यथाहुः नावांतर
क्रियायोगादृते वाक्योपकल्पितात् गुणद्रव्ये कथं भावैर्गृह्येते प्रकृताः क्रिया इति तदेतदग्रे वक्ष्यामः ।

किंच सोमेन यजेतेति द्वियागस्योत्पत्तिवाक्यं नाधिकारवाक्यं ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्याधिकारवा
क्यत्वात् उत्पत्तिवाक्ये चेनेतिकर्तव्यताकांक्षाऽदृष्टविशेषाकांक्षाकल्पितत्वेनेतिकर्तव्यताकांक्षाया विस्प
ष्टमनुत्थानात् तत्सिद्ध्यं सोमस्येतिकर्तव्यतात्वेन भावनायामन्वयः तस्माद्विशिष्टविधावन्वयानुपप
त्त्यावश्यं मत्वर्थलक्षणेति नन्वेवमपि सोमेन यजेतेत्यत्र न विशिष्टविधानं गौरवात् मत्वर्थलक्षणापा
ताच्च किंतु दध्ना जुहोतीतिवत् गुणमात्रविधानमस्तु विधिशक्तेर्गुणे उपसंक्रमात् यथाहुः सर्वत्राख्यात
संबद्धे श्रूयमाणे पदान्तरे विधिशक्त्युपसंक्रान्तेः स्याद्धातोस्त्वनुवादतेति न च यागस्याप्राप्तत्वान्न तदुद्देशे
न सोमविधानमिति वाच्यं ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन यागस्य प्राप्तत्वात् न चास्याधिकारविधित्वे
नोत्पत्तिविधित्वमिति वाच्यं उद्भिदा यजेत पशुकाम इतिवदेकस्यैवोभयविधित्वोपपत्तेः एवं च सोमेन
यजेतेत्यत्र न मत्वर्थलक्षणा यदि तत्र विशिष्टविधानं स्यात्तदान्वयानुपपत्त्या मत्वर्थलक्षणा स्यात् ज्योतिष्टोमे
न स्वर्गकामो यजेतेत्यत्र तु यागविधाने कश्चिन्न मत्वर्थलक्षणा न तावदेतस्मिन्वाक्ये ज्योतिष्टोमेन यागेन स्वर्गं
भावयेदिति सामानाधिकरण्येनैव नामपदस्यान्वयात् नापि सोमेन यजेतेत्यत्र यागोद्देशेन सोमविधाना
त्सोमेन यागं भावयेदिति ननु अनुवादेऽप्यस्ति मत्वर्थलक्षणा अतएवोक्तं विधाने वानुवादे वा यागः करणं

मिष्यतेतत्समीपेपठितीयंतत्तद्धाविर्वेनसंबध्यतीति यतस्त्रविशिष्टविधाविवगुणाविधयस्त्वेवमत्वर्थलक्षणा
तिचेन्नैवं गुणान्वयानुपपत्यादिमत्वर्थलक्षणाेक्रियते यदाचभावनायांधात्वर्थस्यकरणत्वेनान्वयस्त
दान्वयानुपपत्त्यासंगीकर्तव्यागुणविधौचनधात्वर्थस्यकरणत्वेनान्वयोमानाभावात् नन्विदंभाग्जुहोती
त्यत्रहोमस्यकरणत्वंश्रूयतेनन्हावकर्तृतीयाद्यभावात्कल्प्यतइतिचेन्नगुणस्यतत्रविधित्सितत्वेनसा
ध्याकांक्षायांसाध्यत्वकल्पनायाःपर्वोचितत्वात्दध्नाहोमंभावयेदिति नचायमस्तिनियमोभावनायां
धात्वर्थस्यकरणत्वेनैवान्वयोनप्रकारान्तरेणेतिविष्ण्वाद्यपूर्वेप्रवृत्तानुत्पत्त्यानापत्तेः पश्वायेदिव्यजेनस्वर्गका
मः इत्यादौप्रत्ययवाच्यायांवर्तमानार्थभावनायांसमानपदश्रुत्यायागस्यभाव्यत्वमाशंक्यपुरुषार्थत्वेनप
रिहृतंयदिचधात्वर्थस्यकरणत्वेनैवभावनायामन्वयस्तदाभाव्यत्वशंकैवनोदेतीतिव्यर्थंपूर्वपक्षमधिक
रणमापद्येत किंच वाजपेयाधिकरणेतत्रसंबंधस्याशंकापरिहृतः धात्वर्थस्यकरणत्वेनैवान्वयेतत्र
संबंधशंकैवनस्यात् तत्रसंबंधशंकापरिहारौचव्याख्यातौकिंचधात्वर्थस्यकरणत्वेनैवान्वयः गुण
कामाधिकरणेश्रूयत्वेनधात्वर्थान्वयस्योक्तत्वात् तथाहिदध्नेन्द्रियकामस्यजुहुयादित्यत्रनताव
द्धोमोविधीयतेतस्यवचनान्तरेणविहितत्वात्नापिहोमस्यफलसंबंधः गुणापदानर्थक्यापत्तेःनापि

एवं चैवंविधत्वेफलप्रदानर्थक्याधानात्नाप्युभयसंबंधविधत्वेप्राधान्येकर्मणामनेकविधानेवाक्यभेदापत्तेः
यथाहुः प्राधान्येकर्मणिनानेकोविधातुंशक्यतेगुणः अप्राप्तेतुविधीयन्तेबहवोऽप्येकयत्नतः इतिअत्रचकर्म
पदवत् गुणोऽत्युपलक्षणंएकोद्देशेनानेकविधानेवाक्यभेदात् अतएवग्रहैकत्वाधिकरणेसंमार्ष्टी
त्यत्रग्रहोद्देशेनैकत्वसंमार्गविधौवाक्यभेदात्ग्रहैकत्वमविवक्षितमित्युक्तंएवमन्याधिकरणेचयत्तस्ये
रेवतीषुवारवन्तीयमग्निष्टोमसामकृत्वापशुकामोह्येतेनयजेतेत्यत्रवारवन्तीयस्यरेवतीसंबंधेअग्नि
ष्टोमसामसंबंधेफलसंबंधेचविधीयमानेवाक्यभेदाद्भावनोपसर्जनभावनान्तरंविधीयतइत्युक्तं त
स्मात्सोमेहोमेनोभयविधानेसंभवतिनापिहोमान्तरंविधीयतेगौरवप्रसंगात्प्रकृतप्रसंगान्मत्वर्थ प्रकृतहाना
लक्षणाप्रसंगाच्चनापिदध्येवकेवलंकरणत्वेनविधीयतइतियुक्तंकेवलस्यव्यापाराद्यनाविष्टस्यकरण
त्वानुपपत्तेःकर्तृव्यापारव्याप्यत्वनियमात्करणत्वस्यकिंतर्हिविधीयतइतिचेत् दध्नेतितत्तृतीययाउपा
त्तेदध्यधिकरणत्वेफलभावनायांकरणत्वेनविधीयतेप्रत्ययार्थत्वेनदध्नोऽपितस्यप्राधान्यात् एवंचद
ध्यधिकरणत्वेनेन्द्रियंभावयेदितिवाक्यार्थःकरणत्वेचप्रतियोगिकमित्यपेक्षायांसन्निधिप्राप्तोहोमः आ
श्रयत्वेनसंबध्यतेतत्प्रसिद्धोधात्वर्थस्याश्रयत्वेनान्वयः प्रकृतमनुसरामः तस्मिंश्चधात्वर्थस्यनकर

२ होमाश्रयेन दध्ना इन्द्रियं भावयेत्

६
५

णत्वेनैवान्वयः इति किं तर्हि क्वचित्करणत्वेन क्वचित्साध्यत्वेन क्वचिदाश्रयत्वेनेति गुणविधौ च साध्यत्वेनैवा
न्वयः संभवतीति न मत्वर्थलक्षणायाः प्रयोजनं किं च गुणविधौ मत्वर्थलक्षणायां गुणस्य धात्वर्थांगत्वे
किं मानमिति वक्तव्यं न तावत् श्रुतिः मत्वर्थलक्षणायां तृतीयाश्रुतिर्मत्वर्थस्यैवांगत्वे मानं स्यात् ननु
गुणस्यांगत्वे समभिव्याहारात्मकं वाक्यमिति चेत् न तस्मिन्सति तत्र श्रुतेर्वर्तमाने लिंगश्रुती कल्पयित्वा वा न्यायः
बलाबलाधिकरणविरोधात् तत्र हि वाक्यं लिंगश्रुती कल्पयित्वा अंगत्वे मानमित्युक्तं द्वितीये प्रत्यक्षा
श्रुतिस्तत्र ज्यश्रुत्यंतरकल्पनेन तस्या एव वाक्यादृत्तिकल्पनेन यथा प्रयासः समाश्रितः स्यात् विशिष्टवि
धेर्वा गत्या तदाश्रयणं किं च भवन्मते श्रुत्यंतरकल्पनेन तथापि तत्सहकृतः प्रत्यक्ष एव विधिः धात्वर्था
गत्वेन गुणं विधत्ते उत कल्पितविध्यंतरं कल्पनमिति चेन्न श्रुतविधेर्वैयर्थ्यतापत्तेः न हि तेन न तदा गु
णो विधीयते कल्पितविध्यंतरांगीकारात् नापि धात्वर्थः तस्य वचनांतरेण विहितत्वात् अथ अस्य माण
एव विधिः कल्पितश्रुतिसहकृतो धात्वर्थांगत्वेन गुणं विधत्ते इति चेत् तर्हि तत्र कथं धात्वर्थस्यान्वयः
ग करत्वेनेति चेत् नान्वयानुपपत्तेः न हि संभवति दध्ना होमेनेति चान्वयः साध्यत्वेनैवान्वयो दध्ना होमं
भावयेदिति चेन्न तथा सति अन्नवादेरपि धात्वर्थः करणत्वेनैवान्वितोऽत्वेन तद्रूपेति तस्यात् विवक्षित

वाक्यार्थस्यापि नैवमत्वर्थलक्षणाङ्गीकृतः स्यात् तस्मान्न गुणविधौ मत्वर्थलक्षणायत्तद्विधानेवान्यथा देवेति
वार्त्तिकं तन्मतीतिमूलवलेख्यानवलगतिं तथा हि यावद्धि अग्निहोत्रं जुहुयादिति वाक्यं नालोच्यते केवलं दध्ना
जुहोतीति वाक्यमालोच्यते तदा प्रसाधनाय येन होमस्याभावात्तेनानन्तं प्रतिपदाधिकरणावासनावासितानां
न भवत्येव नार्थाभावतः यद्धि यमतो होमेनेष्टं भावयेदिति प्रतिपदाधिकरणे हि सोमेन यजेतेत्यादिषु
किं गुणाश्रयात्वर्थयोः फलभावनाकरणत्वेनान्वयस्तत्प्रकर्षेणेति संदिह्य प्रधानसंबन्धलाभाद्धि निगम
नाविरहाच्च सर्वेषां फलभावनाकरणत्वेनान्वयमाशंक्य लाघवादेकस्यैव फलभावनाकरणत्वमित्युक्तं
भावनाकरणत्वं हि भावनाभाव्यनिर्वर्तकतया भाव्यं च स्वर्गादि नादृष्टमन्तरेणेति अनेकेषां करणत्वे अ
नेकादृष्टकल्पनाप्रसंगात् तस्मादेकस्यैव करणत्वं यदाप्येकस्यैव तदापि किं द्रव्यगुणयोः फलभावना
करणत्वं उत धात्वर्थस्येति भावार्थाधिकरणे संदिह्य द्रव्यगुणयोरेव भावनाकरणत्वं भूतं भाव्यायोपदिश्य
त इति न्यायादित्याशंक्य धात्वर्थस्यैव भावनाकरणत्वं यदस्मृतैर्वैलोचस्त्वादि सिद्धं अतश्च सिद्धमेतद्वाक्यात
रानालोचनदशायां गुणविधावपि धात्वर्थस्य करणत्वाप्रकाशायां गुणपदे मत्वर्थलक्षणेति यदा तु अग्निहो
त्रं जुहोतीति होमविधायकं वाक्यान्तरमालोच्यते तदा होमस्य वाक्यान्तरेण विहितत्वात् तदुद्देशेन गुणमा

मी॰ ६

द्रं विधीयत इत्यतो न नामत्वर्थलक्षणेति अन्यथोक्तं पार्थसारथिमिश्रैः यागाग्निहोत्राधिकरणे फलतो गुणविधि
त्वेन प्रतीतिरित्युक्तं यद्वैतद्वार्त्तिके अधिकारविध्यभिप्रायं उद्भिदा यजेतेत्यादीनामधिकारात् तत्र हि यागो
विधीयते उत्पत्तिवाक्यसिद्धो वा सघतो उभयथापि धात्वर्थस्य करणत्वेनान्वयात् तृतीयान्तस्य तद्वाचित्वे अन्व
यान्वयानुपपत्तेरिति तस्माद्गुणविधौ विनापि लक्षणान्योपपद्यते नेमत्वर्थलक्षणेति अत एव सोमेन यजेत
इत्यत्र न विशिष्टविधानं किन्तु गुणमात्रविधाने यागस्तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्मिन् वाक्ये विधीयत
इत्येवयुक्तं अन्यथा मत्वर्थलक्षणापत्तिरिति अत्रोच्यते यद्यपि यागोद्देशेन सोमविधौ न मत्वर्थलक्षणा त
थापि यागस्याप्राप्तत्वात् सोमेन यजेतेत्यत्र न यागोद्देशेन सोमविधानं संभवति न च ज्योतिष्टोमेनेत्यादिना
प्राप्तत्वात् तदुद्देशेन गुणमात्रं विधीयत इति वाच्यं तस्याधिकारविधित्वेनोत्पत्तिविधित्वानुपपत्तेः कर्म
स्वरूपमात्रबोधको विधिरुत्पत्तिविधिस्तेन च विहितस्य कर्मणः फलविशेषसंबन्धमात्रेऽधिकारविधि
नाक्रियते फलविशेषसंबन्धबोधकस्य अधिकारविधित्वात् यथाऽऽग्नेयोऽष्टाकपालो भवतीत्युत्पत्तिविधि
विहितस्य कर्मणः फलविशेषसंबन्धमात्रं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं विधत्त इति तस्याधि
कारविधित्वं नोत्पत्तिविधित्वं स्यादेतत् दर्शपूर्णमासाभ्यामित्यस्य नोत्पत्तिविधित्वं संभवति आग्नेयोऽष्टा ६

6

कपालऽइत्यादिवाक्यानर्थक्यापत्तेः नहि तेन तदा कर्म विधीयते तेन तस्य तदा दर्शपूर्णमासाभ्यामित्यनेनैव विहितत्वात्
नापि गुणविधानं संभवति अनेककर्मणामनेकगुणविधाने वाक्यभेदापत्तेः अत आग्नेयोऽष्टाकपालऽइत्यस्योत्
पत्तिविधित्वं दर्शपूर्णमासाभ्यामित्यस्य चाधिकारविधित्वमुक्तं ज्योतिष्टोमेनेत्यस्य त्वधिकारविधेरुद्भिदा यजेत प
शुकाम इत्यादिवदुत्पत्तिविधित्वेपि सोमं क्रियमाणेन कस्यचिदानर्थक्यं सोमेन यजेतेत्यस्य गुणविधित्वात्
यागोद्देशेन सोममात्रविधानाच्च न वाक्यभेद इति चेन्मैवं यद्यपि सोमेन यजेतेत्यत्र न वाक्यभेदस्तथापि ज्यो
तिष्टोमेनेत्यस्मिन्वाक्ये कर्मस्वरूपे तस्य च फलसंबंधे विधीयमाने गौरवलक्षणो वाक्यभेदोऽस्त्येव सोमेन यजे
तेत्येतद्वाक्यविहितकर्मणः फलसंबंधमात्रविधाने लाघवात् तदभावः उद्भिदा यजेतेत्यत्र तु वचनांतराभा
वेनागत्या तदाश्रयणं न च सोमेन यजेतेत्यत्रापि कर्मस्वरूपे गुणे च विधीयमाने वाक्यभेदः स्यादिति वाच्यं श्रू
यमाणेन विधिनाप्युपात्तस्याविहितत्वात् विशेषणविधेरार्थिकत्वात् सर्वत्र हि विशिष्टविधौ विशेषणविधिरार्थि
कः ज्योतिष्टोमेनेत्यस्य तु उत्पत्तिविधित्वे कर्मस्वरूपफलसंबंधयोरिति उभयं श्रूयमाणेनैव विधिना विधातव्य
मिति द्विगौरवलक्षणो वाक्यभेदः यथाहुः श्रौतव्यापारनानात्वे प्रधानानामभियोगे वे एकोत्थवसितानां तु ना
र्थोत्तेषां विरुद्ध्यत इति न च सोमेन यजेतेत्यस्योत्पत्तिविधित्वे यद्यपि न वाक्यभेदस्तथापि मत्वर्थलक्षणा स्यादेव

६३

धा

तिवाच्ये तस्याः स्वीक्रियमाणत्वात् लक्षणातो वाक्यभेदस्य जघन्यत्वात् लक्षणा हि पददोषो वाक्यभेदस्तु वाक्यदोषः
पदवाक्ययोर्मध्ये पद एव दोषकल्पनाया उचितत्वात् गुणे त्वन्याय्यकल्पनेति न्यायात् अत एव जातपुत्रः कृष्ण
केशोऽग्नीनादधीतेत्यग्नीनामनुवादेन जातपुत्रत्वकृष्णकेशत्वविधाने वाक्यभेदापत्तेः द्वाभ्यामवस्थाविशेषो
लक्ष्यत इत्युक्तम् तस्माद्वाक्यभेदप्रसक्तौ लक्षणैव स्वीकार्येति तस्मात् सोमेन यजेतेत्ययमेवोत्पत्तिविधिर्न ज्योति
ष्टोमेनेत्यर्थयोरेव लक्षणा वाक्यभेदापत्तेः किंच सोमेन यजेतेत्यत्र यागविधाने क्रत्वर्थे विधानं स्यात् गुण
विधाने त्ववाक्यार्थविधानं तत्र क्रत्वर्थविधाने सम्भवत्युक्तं यथाहुः वाक्यार्थविधिरन्याय्यः क्रत्वर्थवि
धिसम्भवे इति वाक्यार्थः पदान्तरार्थः क्रत्वर्थः ज्योतिष्टोमेनेत्यत्रापि फलोद्देशेन यागस्यैव विधानान्न वाक्या
र्थविधानं तदुत्पत्तिविधित्ववादिनापि तदङ्गीकाराच्च तस्मात् ज्योतिष्टोमेनेत्ययमधिकारविधिरेव अपि च
कर्मस्वरूपविधिस्तत्र स्वीकार्यो यत्र कर्मणो रूपमुपलभ्यते यागस्य च द्वे रूपे द्रव्यं देवता चेति सोमेन यजेतेत्य
त्र यद्यपि देवता नोपलभ्यते सोमयागस्याव्यक्तत्वात् अव्यक्तत्वं च स्वार्थचोदितदेवतारहितत्वं न तु देवता
रहितत्वमात्रं ऐन्द्रवायवं गृह्णातीत्यादिवाक्यविहितग्रहणार्थं देवतानामभावात् ग्रहणार्थाभिरपि देवताभिः
प्रसंगतो यागोपकारस्य क्रियमाणत्वात् तथापि द्रव्यमुपलभ्यत एवेति नाविधायास्वरूपं ज्ञातं प्राक्यमेव ज्यो

तिष्टोमेन स्वर्गकामो यजेतेत्यत्र न द्रव्यं देवता वा श्रूयतेऽतस्तस्योत्पत्तिविधित्वे यागविशेषज्ञाने यागसामान्यस्या
विधेयत्वाद्द्विशेषस्यैव विधेयत्वादित्यादिदोषो न स्यादतो नायं कर्मोत्पत्तिविधिः ननु एवमपि अग्निहोत्रं जुहो
तीत्ययमप्युत्पत्तिविधिर्न स्यात् रूपाश्रवणात् तत् श्रवणाद्दध्ना जुहोतीत्ययमेवोत्पत्तिविधिः स्यात् तथा च
वाक्याग्निहोत्राधिकरणविरोधः तत्र हि अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं दध्ना जुहोतीत्यस्य च गुणविधित्व
मुक्तमिति चेत् सत्यं अग्निहोत्रं जुहोतीत्यत्र यद्यपि रूपं नोपलभ्यते अग्निहोत्रपदस्य तत्प्रख्यन्यायेन नामधेय
त्वात् तदेतदग्रे वक्ष्यामः तथापि तस्योत्पत्तिविधित्वं स्वीक्रियते अन्यथानर्थक्यापत्तेः दध्ना जुहोतीत्यस्य च
नानर्थक्यं गुणविधित्वात् अतः अग्निहोत्रं जुहोतीत्ययं कर्मोत्पत्तिविधिरिति युक्तं ज्योतिष्टोमेनेत्यस्य तु
नानर्थक्यं अधिकारविधित्वोपपत्तेः अतः किमर्थं सम्भवति रूपवति वाक्ये कर्मविधाने तद्रहिते तत्स्वी
कार्यं किंच दध्ना जुहोतीत्यस्य कर्मोत्पत्तिविधित्वे यद्यस्माज्जुहोतीत्यनेनैतत्कर्मानुवादेन दध्यो विधाने
प्राकृते उत्पत्तिशिष्टगुणावरुद्धत्वात् उत्पत्तिशिष्टगुणावरुद्धे हि न गुणान्तरं विधीयते आकाङ्क्षाया उत्प
त्तिशिष्टेनैव निवृत्तत्वात् अतस्तेनापि विशिष्टं कर्मान्तरं विधेयं तथा चानेकार्थकल्पनागौरवं अग्निहो
त्रं जुहोतीत्यस्य तूत्पत्तिविधित्वे एतद्वाक्यविहितस्य कर्मणो द्रव्याकाङ्क्षायां गुणपदे च खलेकपोतन्याये

नरभागहोतिययमाग्नहोत्रीत्यादिवाक्येषुगुणविधीयतेइतिनानेकारहककल्पनागौरवंयतोऽग्निहोत्रंजुहोतीत्यय
मुत्पत्तिविधिः ययमाग्नहोत्रीत्यादयस्तुगुणविधयइतियुक्तंसोमेनयजेतेत्यत्ररूपवतिवाक्येकर्मोत्पत्तिवि
धानेस्वीक्रियमाणेनकिंचिद्दूषणंएवंदध्येकस्माद्दृष्टस्यतत्त्वात्तस्माद्युक्तंसोमेनयजेतेत्ययमेवो
त्पत्तिविधिरिति अलमनयाप्रसक्तविधिनिरूपणागतप्रपंचचिंतयाप्रकृतमनुसरामः तस्मिंश्चविधिः प्र
योजनवत्तमप्राप्तमर्थंविधत्तेइति सचविधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयो
गविधिश्चेति तत्रकर्मस्वरूपमात्रबोधकोविधिरुत्पत्तिविधिः यथाग्निहोत्रंजुहोतीतिउत्पत्तिविधौचकर्म
णः करणत्वेनैवान्वयः होमेनेष्टंभावयेत् नतुहोमंकुर्यादितिसाध्यत्वेन तथासतिसाध्यस्यसाध्यांतरान्व
यायोगेनाधिकारवाक्यावगतफलसंबंधोनस्यात् करणत्वेनत्वन्वयेहोमेनेष्टंभावयेत् किंतदिष्टमित्याकांक्षा
यांफलविशेषसंबंधघटते नचोत्पत्तिविधौइष्टवाचकपदाभावेनकर्मणाऽष्टंभावयेदितिकथंवाक्यार्थइति
वाच्यंविधिश्रुतेरेवेष्टबोधकत्वात् साहिपुरुषार्थंपुरुषंप्रवर्तयतीकर्मणः फलसंबंधमात्रंबोधयतितस्मादु
क्तमुत्पत्तिविधौकर्मकरणत्वेनान्वेतीति अतएवोद्भिदायजेतेत्यादौतृतीयांतोद्भिच्छब्दउपपद्यतेउद्भिदा
यागेनेष्टंभावयेदित्यन्वयोपपत्तेः येषामपीष्टसाधनत्वंलिङर्थस्तेषामपितृतीयांतानांकर्मनामधेयानामन्व

योनुपपन्नएव न हि संभवति यमाद्रूस्साध्यंतु द्धिदेति तृतीयोपात्तस्य कारकस्य लिंगसंख्यान्वयायोगस्य
क्रिययैवान्वयात् ननु तवाप्यग्निहोत्रंजुहोतीत्यादिषु द्वितीयान्तानां कर्मनामधेयानामन्वयोनुपपन्नः न
हिसंभवति होमेनभावयेदग्निहोत्रमिति मत्वर्थश्रूयमाणानामेव तद्द्वितीयायाअर्थोतिमसाध्यत्वानुवादः होम
स्यहि करणत्वेनान्वयात् असाधितस्य च करणत्वानुपपत्तेः तस्माद्ध्यानन्वयोवस्थितो नास्मत्नु ननु जुहो
तीतिवत्तृतीयार्थे लक्षयति अग्निहोत्रेण होमेनेष्टं भावयेदित्युत्पार्थसारथिमिश्रैः अतश्च द्वितीयान्ता
नां कर्मनामधेयानामन्वयोप्युपपन्नः तत्सिद्धमुत्पत्तिविधेः कर्मकरणत्वेनान्वेतीति अंगसंबंधबोधको
विधिर्विनियोगविधिः यथा दध्ना जुहोतीति सहि तृतीयाप्रतिपन्नांगभावस्य दध्नः होमसंबंधं विधत्ते
दध्ना होमं भावयेदिति एतस्य विधेः सहकारिभूतानि षट्प्रमाणानि श्रुतिलिंगवाक्यप्रकरणस्थान
समाख्यारूपाणि एतत्सहकृतेन विधिनांगत्वं परोद्देशप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञा
प्यते तत्र निरपेक्षोरवः श्रुतिः सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्री चेति तत्र विधात्री लिङाद्यात्मि
का अभिधात्री व्रीह्यादिश्रुतिः यस्य च शब्दस्य श्रवणादेव संबंधः प्रतीयते सा विनियोक्त्री सा च त्रिविधा
विभक्तिरूपा समानाभिधानरूपा एकपदरूपा चेति तत्र विभक्तिश्रुत्यांगत्वं यथा व्रीहिभिर्यजेतेति तृतीया

अन्या व्रीहीणां यागांगत्वेन चोदयतीति शिष्टः पुरोडाशवदुक्तहृदयागे कथं व्रीहीणामंगत्वमिति वाच्यं पुरोडाशप्रकृतित
योपपत्तेः पशोरिव हृदयादिरूपहविः प्रकृतितया यागांगत्वेन च साक्षात्पशोरेवांगत्वं किं न स्यादिति वाच्यं
तस्य विशसनात् अवदीयमानत्वाच्च हृदयादीनां अवदीयमाने हि हविर्यथा पुरोडाशादिमध्यात्पूर्वार्द्धा
च्चावद्यतीति वाक्यात् हृदयादीनि चावदीयमानानि न पशुः हृदयस्याग्रेऽवद्यतीति वाक्यात् अतो हृदया
दीन्येव हवींषि पशुस्तु प्रकृतिद्रव्यं पात्नीवतयागे तु साक्षात्पशोरेवांगत्वं तस्य जीवत एव पर्यग्निकृतं पात्नीव
तमुत्सृजेदिति उत्सर्गविधानात् यत्र तु विशसनं तत्र पशुः प्रकृतिद्रव्यमिति सिद्धं एवं व्रीहयोऽपि प्रकृति
द्रव्यतया यागांगं तृतीयाश्रुत्येति आहः एवमपि क्रियांगत्वं तृतीयाश्रुत्या न चामूर्त्तस्य तस्य कथं क्रिया
गत्वमिति वाच्यं एकहायन्यादिरूपद्रव्यपरिच्छेदद्वारा तदुपपत्तेः व्रीहीन् प्रोक्षतीत्यत्र प्रोक्षणस्य व्रीह्यंगत्व
द्वितीयाश्रुत्यात् न प्रोक्षणं व्रीहिस्वरूपार्थं स्वरूपेऽनर्थकत्वात् व्रीहिस्वरूपस्य प्रोक्षणं विनानुपपत्त्यभा
वात् किन्तु अपूर्वसाधनत्वप्रयुक्तं यदि व्रीहिषु प्रोक्षणं क्रियते तदा तैर्यागे कृते सर्वं भवति नान्यथेति अतः
प्रकरणसहकृतया द्वितीयाश्रुत्या तदुक्तं निर्दिष्टमिति प्रनाड्या यदपूर्वसाधनं तदंगत्वं प्रोक्षणस्योच्यत इति
एवं सर्वेष्वंगेष्वपूर्वप्रयुक्तत्वं वेदितव्यं एवं इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र

२

यिद्वितीयाश्रुत्या मंत्रस्याग्न्यभिधानांगत्वे यत्तु वाक्यीयोऽयं विनियोग इति तन्न तथा सति वाक्याल्लिंगस्य बली
यस्त्वेन तथा वद्वाक्यादग्न्यभिधानांगत्वं भवति तावल्लिंगादग्न्यभिधानामात्रांगत्वमेव स्यात् स्योनं ते सदनं कृणोमीय
स्येव सदनांगत्वे श्रौत विनियोगप्रदेतत्पावल्लिंगादग्न्यभिधानामात्रांगत्वं संभवति तावत्कृत्या ऐंद्र्या गार्हपत्यमु
पतिष्ठत इत्यत्र तृतीयाश्रुत्या ऐंद्र्या गार्हपत्योपस्थानांगत्ववत् अग्न्यभिधायकत्वाविनियोगः क्रियत इति
युक्तं मंत्रस्याग्न्यभिधानांगत्वेन तस्याश्रौतपवाय विनियोगः यदाहवनीये जुहोतीति आहवनीयस्य होमां
गत्वं सप्तमीश्रुत्येति यद्यपि विभक्तिश्रुत्या विनियोगस्तथापि पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समा
नाभिधानश्रुत्या कारकांगत्वं यजेतेति आख्याताभिहितसंख्याया भावनांगत्वं समानाभिधानश्रुतेरेक
पदश्रुत्या च यागांगत्वमिति नचामूर्त्तायास्तस्याः कथं यागांगत्वमिति वाच्यं कर्तृपरिच्छेदद्वारा तदुपपत्तेः
कर्त्ता चाक्षेपलभ्यः आख्यातेन हि भावनोच्यते सा च कर्त्तारं विना नोपपद्यत इत्यमाक्षिपति ननु किमित्येवं वर्ण्यते
आक्षेपलभ्यः कर्त्तेति आख्यातवाच्य एव किं न स्यात् आख्यातश्रवणे भावनाया इव कर्त्तुरपि प्रतिपत्तेः न च
भावनयैवाक्षेपसंभवे किमिति तद्वाचकत्वं कल्पनीयमिति सांप्रतं तथा सति आख्यातवाचकत्वेन भाव
नाक्षेपसंभवे तद्वाचकत्वमपि न स्यात् किंच भावनाया न केवलं कर्त्रैव संबंधः कारकांतराणामपि संबंधात्

उ ९
10

अतः सा न रूढिरिति कर्तारमेवाभिधेयत् विधेयाभावात् कर्तात्वभावनयैव संबद्धो न कारकांतरेण गुणानां च परा
र्थत्वादसंबंधः समत्वात्स्यादिति न्यायात् अतः स रूढिरिति नामादिरिवेदिति स एवाख्यातवाच्यो भावनात्स्यादे
पलभ्येव किं न स्यात् किंचैवं तृतीयादिविभक्तीनामधिकरणत्वादिवाचकत्वं न स्यात् तेषामपि कर्तृत्वद
देपलाभसंभवात् किंच यदि कर्तानवाच्यः स्यात्कथमेकत्वेतेनान्वीयात् न हि शाब्दमशाब्देनान्वेति अ
नायाऊहादिलोपप्रसंगः किंचदेवदत्तः पचतीति सामानाधिकरण्यं न स्यात् न हि केवलं भावनावाचक
स्याख्यातस्य देवदत्तपदेन सामानाधिकरण्यमुपपद्यते एकार्थनिष्ठत्वाभावात् कर्तृवाचकत्वे तूपपद्य
ते एवं लः कर्तरीति व्याकरणस्मृतिविरोधश्च कर्तुरनभिधेयत्वे स्पष्ट एव किंच कर्तुरनभिधेयत्वे देव
दत्तेन पचतीति प्रयोगप्रसंगः कर्तृकरणयोस्तृतीयेत्यनभिहितयोः कर्तृकरणयोर्विहिता आख्यातेन च कर्तानभि
हितत्वइति कर्तृवाचनीत्तृतीया स्यात् देवकर्तुरभिधानेत्वभिहितत्वाद्देवदत्ते न प्राप्नोति तस्याः अनभिहिता मा
धिकारत्वात् देवदत्तः पचतीति प्रथमात्र प्राप्नोत्येव प्रथमाया अभिहितकारकविभक्तित्वात् प्रातिप
दिकार्थमात्रवाचित्वाद्दानं च तदा प्रातिपदिकेनैवार्थस्योक्तत्वात्प्रथमा वैयर्थ्यं लिंगसंख्याप्रतिपत्त्यर्थं
तस्या अवश्यकत्वात् केवलप्रातिपदिकस्याप्रयोगासाधुत्वाच्च ततश्च यदि कर्तानवाच्यः स्याद्देवदत्तेः

१०

नपचतीतिप्रयोगः स्यात्तस्मादाख्यातवाच्यः कर्त्तेतिसिद्धमितिपूर्वपक्षसंक्षेपः अत्राहुः सर्वदिग्राह्या
र्थोयः प्रकारांतरेणालभ्यते अनन्यलभ्यः शब्दार्थ इतिन्यायात् अतएवनगंगायांदस्यतीरमर्थः लक्षणएव
प्रतिपत्तिसंभवात् अतएवनवाक्यार्थेशक्तिः एवंचाख्यातवाच्याभावनाकर्त्तारंविनानुपपन्नातमाक्षि
पतीतिअक्षेपादेवकर्तुः प्रतिपत्तिसंभवे किमितितद्वाचकत्वमाख्यातस्यकल्पनीयंनचविनिगमनावि
रहःकृतमाह्निकर्त्तापवंचकर्त्रतरेवभावनापरपर्यायाः आश्रयाधिकरणन्यायेनाख्यातवाच्यत्वसंभवेनत
द्वतःकर्त्तुर्वाच्यत्वकल्पनीयंगौरवप्रसंगात् नचभावनाकारकांतरेणापिसंबद्धातद्ज्ञिकात्कथंटितिक
र्तारमाक्षिपतीतिवाच्यं साहियथानियमेनकर्त्रासंबद्धानतथाकरणादिकारकांतरेणेतिप्रतीत्यादिसु
तयातदनाक्षेपात् अतःसाप्रथमंकर्त्तारमेवाक्षिपतिनकारकांतरं अतएवाख्यातानभिहितासंख्यानकार
कांतरेणसंबध्यतेतस्यप्रथममनुपस्थितेः अतएवतृतीयादिविभक्तीनांकरणादिवाचित्वभावनाया
स्तैः सहनियतसंबंधाभावेनतयातेषांनियमेनानाक्षेपात् आख्यातश्रवणात्प्रागपितृतीयादिविभक्ति
श्रवणेकरणादिप्रतीतेर्जायमानत्वान्नचप्रथमाह्नीसंख्याकथमप्रथमाश्रुतेनकर्त्रान्वेतीतिवाच्यं कर्त्तुर्लक्षणागी
कारात् यथाचलक्षितंतीरंप्रथमाश्रुतेनघोषेणान्वेति एवंलक्षितःकर्त्ताएकत्वेनान्वेष्यति अतएवचदेवदत्तः

६३ ॥

पचतीतिसामानाधिकरण्यमुपपद्यते कर्त्तुर्लकारेणानभिधाने न चेत् मुख्यं संभवति किमिति लादेशिकत्वं सौ कार्यमिति
वाच्यं अनन्यलभ्यशास्त्रार्थत्वस्य स्थायित्वात् अन्यथासिद्धे देवदत्तः इत्यपि सामानाधिकरण्यं मुख्यं स्यात्
किंच आख्यातवाच्यः कर्त्तेतिवादिनो मतेऽपि देवदत्तः पचतीति सामानाधिकरण्यं न मुख्यं तन्मते आख्या
तेन तृतीयावत् निष्कृष्टशक्तिमात्ररूपकर्तृकारकाभिधानात् शक्तिमद्द्रव्यस्याक्षेपाधिकरणान्वयेनान
भिधानात् देवदत्तशब्देन च द्रव्यमात्राभिधानात् अतश्च भिन्नार्थनिष्ठत्वात् तन्मतेऽपि न मुख्यं सामानाधि
करण्यं किंच लादेशिकमेवेति न कश्चिद्विशेषः नच लः कर्त्तरीति व्याकरणस्मृतिबलादाख्यातवा
च्यः कर्त्तेति वाच्यं नहि वाच्यवाचकभावो व्याकरणस्मृत्यधीनः तस्य न्यायसहितान्वयव्यतिरेकगम्यत्वा
त् भवतस्मृतिगम्यस्तथापि नेयं स्मृतिः कर्त्तुराख्यातवाच्यत्वे प्रमाणं किंतु कर्त्तुरेकत्वे एकवचनात्म
को लकारः द्वित्वे द्विवचनात्मकः बहुत्वे बहुवचनात्मक इत्यस्मिन्नर्थे प्रमाणं द्व्येकयोर्द्विवचनैकवचने
बहुषु बहुवचनमित्येतेनास्याः स्मृतेरेकवाक्यत्वात् यत्तु कर्त्तुरनभिधाने देवदत्तेन पचतीति तृती
याप्रसंग इति तन्न तृतीया हि कर्तृप्रतिपत्त्यर्थं न प्रकृतिसंख्याप्रतिपत्त्यर्थं वा तत्र कर्तृत्वभावनाक्षेपादेव
लभ्यत इति न तत्र तृतीयापेक्षा न स्यात् आख्यातेनैव प्रतीयत इति न तत्राप्यपेक्षा यथाहुः संख्याया ॥

यो कारके वार्थैर्विभक्त्यादिः प्रवर्त्तते उभयं चात्र न सिद्धं भावनातिङ्भक्तितः इति यत्र नाख्यातेन नतेन्द्रना सं
ख्योच्यते तत्र भवत्येव तृतीया यथा देवदत्तेनौदनः पच्यत इति तस्मात्कर्तुरनभिधाने किंचिद्दूषणमित्यल
मिति विस्तरेण प्रकृतमनुसरामः तत्सिद्धस्त्रिविधः श्रुतिविनियोगः सेयं श्रुतिर्लिङ्गादिभ्यः प्रबलं प्रमाणं
लिङ्गादिषु हि न श्रवणं विनियोजकः प्रत्यक्षः किं तु कल्प्यः यावच्च तैर्विनियोजकः श्रुतिः कल्प्यते तावत्प्रत्य
क्षया श्रुत्या विनियोगस्य कृतत्वात् तेषां कल्पकत्वशक्तिर्विहन्यते इति श्रुतेः प्राबल्यं अत एवैन्द्र्या गार्हप
त्यमुपतिष्ठत इत्यत्र यावल्लिंगादैन्द्र्या इन्द्रोपस्थानार्थत्वं कल्प्यते तावत्प्रत्यक्षया श्रुत्या गार्हपत्योपस्थितार्थ
त्वं क्रियत इति ऐन्द्री गार्हपत्योपस्थानाङ्गं सामर्थ्यं लिंगं यथाहुः सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयत इति
तेनांशत्वं यथा बर्हिर्देवसदनं दामीत्यस्य लवनाङ्गत्वं बर्हिर्लवने प्रकाशशक्तिसमर्थः तच्च लिंगं द्विविधं
सामान्यसंबन्धबोधकप्रमाणान्तरापेक्षं तदनपेक्षं च तत्र यदन्तरेण यन्न संभवति तस्य तदङ्गत्वं तदनपेक्षं
केवललिंगादेव यथार्थज्ञानस्य कर्मानुष्ठानाङ्गत्वं न ह्यर्थज्ञानमन्तरेणानुष्ठानं संभवति यदन्तरेणापि यत्संभ
वति तस्य तदर्थत्वं तदपेक्षं यथोक्तस्य मन्त्रस्य लवनाङ्गत्वं लवने हि मन्त्रं विनाप्युपायान्तरेण कर्तुं शक्ये अ
तो न मन्त्रो लवनस्वरूपार्थं संभवति किं तु अपूर्वसाधनीभूतलवनप्रकाशनार्थः तच्च वचनसामर्थ्यमात्रा

१२

दवगम्यते लवनप्रकाशनमात्रसामर्थ्यात् अतो विशेषप्रकरणादि सामान्यसंबंधे यथा बोधकोऽसौ कार्ये दर्शपूर्णमा
सप्रकरणोद्दिष्टमंत्रस्य पाठादेवमवगम्यते अनेन मंत्रेण दर्शपूर्णमासयोः सर्वसंबंधि किंचित्प्रकाश्यत इति अ
न्यथा प्रकरणपाठवैयर्थ्यप्रसंगात् किं तत्सर्वसंबंधि प्रकाश्यमित्यपेक्षायां सामर्थ्याद्बर्हिर्लवनमित्यवग
म्यते तद्धि बर्हिःसंस्कारद्वारा सर्वसंबंधीति मंत्रस्य सामर्थ्यात् तदर्थत्वे सति नानर्थक्यं प्रसज्यते तस्माद्बर्हिर्देव
सदनं दामीत्यस्य प्रकरणात् दर्शपूर्णमाससंबंधितयावगतस्य सामर्थ्याल्लवनांगत्वमिति सिद्धं पूषानुमं
त्रणमंत्राणां तु यागानुमंत्रणसमाख्यया यागसामान्यसंबंधे ऽवगते सामर्थ्यात् पूषयागसंबंधो ऽवगम्यते
ननु तेषां यावत्समाख्यया पूषयागेन सामान्यसंबंधो ऽवगम्यते तावत्प्रकरणात् दर्शपूर्णमासाभ्यामेव सा
मान्यसंबंधो ऽवगतः समाख्यातस्तस्य बलीयस्त्वात् अत एव पौरोडाशिकमिति समाख्याते ब्राह्मणे याम्ना
तानामपि प्रयाजानां प्रकरणात् सान्नाय्ययागांगत्वमपीत्युक्तं किं च यागानुमंत्रणसमाख्याया
पि न पूषयागेन सामान्यसंबंधो ऽवगम्यते किं तु यागमात्रेण प्रकरणेन तु दर्शपूर्णमासाभ्यामेव विशेष
संबंधो ऽवगम्यते अतः प्रकरणाज्झटिति तत्संबंधस्यैवावगतत्वात् तदर्थत्वमेव तेषां युक्तं पूषेति प्राद्य
स्य पुरस्तादितिव्युत्पन्याक्रमं चिदप्याद्यभिधायित्वात् मैवं पूषानुमंत्रणमंत्रे द्विशब्द यमाणो पद्यपत्तमवगम्य १२

ते मुख्याभिधानसमर्थत्वादयं मंत्रः स्वतत्प्रकाशनार्थः प्रतिलवनमंत्रश्च लवनप्रकाशनार्थः । न तत्र प्रकरणाद्यपे
क्षायेन तेषामनुपजीव्यत्वेन प्राबल्यं स्यात् । प्रकरणं तु दर्शपूर्णमासार्थत्वे तस्य वाक्यलिंगश्रुतिकल्पनेन वि
नियोजकत्वाल्लिंगस्योपजीव्यत्वेन प्राबल्यं । अतो लिंगान्मुख्यप्रकाशनार्थत्वेवगते तन्मात्रप्रकाशनमनर्थकमिति
अपूर्वसाधनमुख्यप्रकाशनार्थत्वं च कल्प्यं । किं तद्दर्शपूर्वमित्यपेक्षायां यागानुमंत्रणसमाख्यानुगृहीताल्लिंगा
न्मुख्ययागापूर्वसंबंधिदेवताप्रकाशनार्थोयमित्यवगम्यते । अतो यद्यपि समाख्यातः प्रकरणं बलीयस्तथा
पि तस्य लिंगेन बाधितत्वात्समाख्याया दुर्बलाया अपि प्रबललिंगाश्रितत्वेन प्राबल्यात्सैव सामान्यसंबंधे प्रमाणं
संभवति । दुर्बलस्यापि प्रबलाश्रितस्य प्राबल्ये अत एव श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबल
पदार्थाश्रितत्वेन प्राबल्यात् पदार्थधर्मस्य गुणभूतस्य क्रमस्य त्यागेन वेदकरणानंतरं क्षुते आचमनमेव कार्यमित्यु
क्तं । यथाहुः अत्यंतबलवंतोपि पौरजानपदा जनाः । दुर्बलैरपि बाध्यंते पुरुषैः पार्थिवाश्रितैरिति । यत्तु मुख्येति
प्राहुः कश्चिदस्याद्यभिधायीति तन्न । तस्यादंतकोहि सऽइत्यादिवाक्यशेषेण वैदिकप्रसिद्ध्या चार्थविशेषे
रूढत्वात् रूढेः चावयवार्थालोचनसापेक्षायोगाद्बलीयस्त्वात् । अत एव वर्षासु रथकारोऽग्नीनादधीतेत्यत्र
रथकारपाठेन सौधन्वनापरपर्यायो वर्णविशेष उच्यते रूढेः प्राबल्यान्न तु रथं करोतीति व्युत्पत्त्या द्विजात

६
१२
+पदार्थस्य ३
13

यो योगस्य दौर्बल्यादित्युक्ते पक्षे न साध्यु[क्रतु]क्ते समाख्यया सामान्यसंबंध एव गते सामर्थ्यान्नूषयाग संबंधः सूक्तान्तमंत्रण
मंत्राणामिति यथाहुः याज्यानुमंत्रणानीति समाख्या क्रतुयोजिका तस्माच्छन्दस्तुरीयेन प्राप्तिस्तद्दैवते क्रतावि
ति तत्सिद्धं प्रमाणान्तरसिद्धसामान्यसंबंधस्य [illegible] विनियोजकं लिंगमिति तत्र मंत्रविनियोजकं लिंगं मुख्यमे
व ग्रथ्ये विनियोजकं न गौणं मुख्यार्थस्य प्रथममुपस्थितत्वेन तत्रैव विनियोगबुद्धेः पर्यवसन्नायां तु न गौणे
र्थे विनियोगकल्पनायां गौरवप्रसंगात् अत एव बर्हिर्देवसदनं दामीति मंत्रः सामर्थ्यात् कुशलवनांगं ते
णं मुख्यत्वात् ननु लवनराजिलवनांगमित्युक्ते तदिदं लिंगं वाक्यादिभ्यो बलवत् तेषां हि न साक्षाद्विनियो
जकत्वं किंतु श्रुतिं कल्पयित्वा न चासमर्थस्य श्रुतिं कल्पयित्वा विनियोगकल्पना संभवतीति सामर्थ्यस्या
पि कल्पने नोपजीव्यत्वात् अतस्तैर्यावत् सामर्थ्यं कल्पयित्वा श्रुतिः कल्प्यते तावदेव क्लृप्तेन सामर्थ्येन श्रु
तिं कल्पयित्वा विनियोगः क्रियत इति तस्य प्राबल्यं अत एव स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्प तेन
यामीत्यस्य सदनांगत्वं लिंगात् न तु वाक्यात् स्थापनांगत्वं तस्य दौर्बल्यादिति समभिव्याहारो वाक्यं समभि
व्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणं यथा यस्य पर्णमयी जुहू
र्भवति न स पापं श्लोकं शृणोतीति इति अत्र हि न द्वितीयादिविभक्तिः श्रूयते केवलं पर्णताजुह्वोः समभिव्याहा

१२

स्मात्रेण तस्मादेव च पर्णतायास्तु जुह्वंगत्वे न वाऽनर्थक्यं तु जुहूग्रहणेनापूर्वलक्षणात् तदर्थवाक्यार्थः पर्णतयाऽप्रवर्त्त
द्रव्यधारणद्वारा यदपूर्वं साधनं तद्भावयेदिति एवं च पर्णतया यदि जुहूः क्रियते तेन देवतत्साध्यमपूर्वं भवति नान्य
थेति गम्यते इति न पर्णतायाः वैयर्थ्यं प्रवर्त्तद्रव्यविधारणद्वारेति चावश्यं वक्तव्यं अन्यथाऽश्वादिष्वपि पर्णतापत्तेः सा
चेयं पर्णतानारभ्याधीतानां सर्वक्रतुषु गच्छति विकृतिषु चोदकेनापि प्राप्तिसंभवे द्विरुक्तत्वापत्तेः किं तु प्रकृतिषु
तदुक्तं प्रकृतौ वाद्विरुक्तत्वादिति अत्र विकृतिर्यत्नोऽङ्गानि गृह्णाति साऽप्रकृतिरिति न प्रकृतिग्रहेन विवक्षितं गृ
हमेधीये पर्णतायाश्चाप्राप्तिप्रसंगात् न हि गृहमेधीये तत्र काचन विकृतिरंगानि गृह्णाति मानाभावात् किं तु
चोदकाप्यत्रांगप्राप्तिस्तत्कर्म प्रकृतिग्रहेन विवक्षितं यथा दर्शपूर्णमासौ तत्र हि न चोदकादंगप्राप्तिः प्रकर
णपठितैरेवांगैर्नैराकांक्ष्यात् गृहमेधीयादिष्वपि न चोदकादंगप्राप्तिः प्रकृतोपकारैरेवाज्यभागादिभिर्नै
राकांक्ष्यात् अतो यत्र चोदकाप्राप्तिस्तत्रानारभ्याधीतानां सन्निवेशः साप्तदश्यं त्वनारभ्याधीतमपि न प्रकृतौ गच्छ
ति प्रकृतेः पांचदश्यावरोधात् किं तु विकृतिषु गच्छति तत्रापि न सर्वासु गच्छति चोदकप्राप्तपांचदश्यबाध
प्रसंगात् किं त्वप्राप्तदाश्वतसाप्तदश्यं मित्रविंदादिषु गच्छति यथाहुः एवं च प्रकृतावेतन्नैव दर्शस्य प्रति
ष्ठितं विकृतौ च न यत्रास्ति साप्तदश्यं पञ्चदशः क्षतिरिति न च वाक्यवैयर्थ्यं अनारभ्याधीतस्यैव साप्तदश्यस्य मित्र

१५

14

विदादिप्रकरणस्थेन वाक्येनोपसंहारात् उपसंहारो नाम सामान्यप्राप्तस्य विशेषे नियमनं यथाहुः सामान्यवि
धिरस्पष्टः संक्षिप्येत विशेष्यत इति तत्रानारभ्यविधिः सामान्यविधिः मित्रविंदादिप्रकरणस्थस्तु विशेषविधिरि
त्याशंक्य तावत्प्रकृतमनुसरामः तस्मिन्द्वाक्याद्गम्यते तदिदं वाक्यं प्रकरणाद्दुर्बलीयः प्रकरणं हि न साक्षाद्धि नियोज
कं तद्धि आकांक्षारूपेण चाकांक्षा स्वयं प्रमाणं किं तु साकांक्षं वाक्यं दृष्ट्वा भवत्येतादृशी मतिः नूनमिदं वाक्यं केनचि
द्वाक्येनैकवाक्यभूतमिति तत्र आकांक्षारूपप्रकरणं वाक्यस्य वाक्यान्तरैकवाक्यत्वे प्रमाणं एवं च यावत्प्रकरणं वा
क्यं कल्पयित्वा विनियोजकं भवति तावद्वाक्यं लिङ्गस्य श्रुतिं कल्पयित्वा विनियोजकं भवतीति प्रकरणाद्वाक्यं ब
लीयः अतएवैन्द्राग्नीरूपं देवविरक्षयेनाम वीहयेनं महोऽन्यायेन कामित्यैन्द्राग्नीपदस्य लिङ्गाद्दर्शाङ्गत्वे
सिद्धेऽप्यदिदं देवविश्वेत्यादेरपि तदेकवाक्यत्वाद्दर्शाङ्गत्वेन तत्प्रकरणाद्दर्शपूर्णमासाङ्गत्वं प्रकरणाद्वाक्यस्य बा
लीयस्त्वादिति उभयाकांक्षाप्रकरणम् यथा प्रयाजादिसमिधो यजेतेत्यत्र हि दृष्टविशेषस्यानिर्देशात्सा शे
मिधायेनभावयेत्किमित्यपेक्षापकार्याकांक्षा दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्क
का थमित्युपकारकाकांक्षा अतउभयाकांक्षया प्रयाजानां दर्शपूर्णमासाङ्गत्वं सिध्यति ननु अस्मिन्प्रयाजादि
वाक्ये दृष्टविशेषानुपपत्तेः तर्हि विश्वजिन्न्यायेन स्वर्गः फलं कल्प्यतां विश्वजिदधिकरणे हि विश्वजिता

१५

यद्येतेन्यत्रफलस्याश्रवणात्फलमंतरेणाचविधिश्रुतेरनुपपत्तेरवश्यंफलेकल्पयितव्ये सर्वाभिलषि
तत्वेनस्वर्गःफलमित्युक्तं नइष्टं सस्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वादितिरात्रिसत्रन्यायेनवार्थवादि
कंफलंकल्प्यतां रात्रिसत्राधिकरणेहि प्रतितिष्ठंतिहवेयएतारात्रीरुपयंतीत्यत्रविध्युद्देशेफलस्याश्रव।
णात्फलमंतरेणाचविधिश्रुतेरनुपपत्तेरवश्यंफलेकल्पयितव्ये अर्थवादिकंप्रतिष्ठाख्यंफलमित्युक्तं
विश्वजिदधिकरणन्यायेनानुपस्थितस्वर्गकल्पनेनतस्यप्रकृतसंबंधकल्पनेगौरवादर्थवादोपस्थित
स्यैवप्रकृतफलत्वकल्पनेलाघवात् नइष्टं फलमात्रेयोनिर्देशादस्यश्रुतोसन्नुमानंस्यादिति न।
स्मात्हिविश्वजिन्न्यायेनरात्रिसत्रन्यायेनवास्वतंत्रफलार्थत्वेसंभवतिकिमितिदर्शपूर्णमासांगत्वंस्वी
क्रियतइतिचेन्नैवं स्वतंत्रफलार्थत्वेऽन्यतराकांक्षयासंबंधःस्यात् नह्यत्रफलस्यसाधनाकांक्षा
स्ति श्रूयमाणंहिफलंसाधनमाकांक्षतीतिनचात्रनश्रूयते एवंचफलस्याकांक्षाभावात्केवलंकिंभाव
येदितिप्रयाजानांभाव्याकांक्षयैवस्वतंत्रफलार्थत्वंस्यात् दर्शपूर्णमासार्थत्वेतूभयाकांक्षाप्रमा
णंप्रयाजानांभाव्याकांक्षायाःप्रकरणत्वेनकथंभावाकांक्षायाःसत्वात् अन्यतराकांक्षातोनउभयाकां
क्षाबलीयसीतिवक्ष्यते ननुदर्शपूर्णमासार्थत्वमेवयुक्तंनस्वतंत्रफलार्थत्वमिति नइष्टं द्रव्यसं
स्कारकर्मसुपरार्थत्वात्फलश्रुतिरर्थवादःस्यादिति अत्रद्रव्येफलश्रुतिर्यस्यपर्णमयीजुहूर्भवति
नसपापंश्लोकंशृणोतीत्येवमाद्यासंस्कारेफलश्रुतिर्यदांक्तेचक्षुरेवभ्रातृव्यस्यवृंक्तइत्येवमा।

दे ९५ याः कर्माणि फलस्य निर्वर्त्यं वा फलस्य तत्संस्क्रियते यत्फलस्य यागस्य तु प्रयाजादयस्तत एवमाद्याः कर्म
परं चारादुपकारकं कर्मपदं द्रव्यस्य संस्कारकर्मणः एव कुसंकीर्तनादिरूपास्तास्तावदिदंस्म
करणम् क्रियायाः एव विनियोजकं न द्रव्यगुणयोः कर्मयोस्तु क्रियायोगादि नियोजकं उत्तरः।
तिचेदुच्यते यजेत स्वर्गकाम इत्यत्राख्यातान्तप्रत्ययार्थो भावनाभिधीयते भावयेदिति सा चांशत्रय
मपेक्षते किं भावयेत् केन भावयेत् कथं भावयेदिति करणाकांक्षायां समानपदोपात्तो यागो।
भावार्थाधिकरणन्यायेनान्वेति यागेन स्वर्गं भावयेदिति ततः कथमिति कथंभावाकांक्षा
जायते तस्यां चाकांक्षायां सन्निधौ पठितमश्रूयमाणफलकं च क्रियाजातं तदेवोपकारा
कांक्षया इति कर्तव्यतात्वेनान्वयमनुभवितुं योग्यं क्रियाया एव लोके कथंभावाकांक्षायाम
न्वयदर्शनात् नहि कुठारेणाभिद्यादित्यत्र कथमित्याकांक्षायां हस्त इति केवलमुच्चार्यमाणो
पि हस्तोन्वयं प्राप्नोति किं तर्हि हस्तेनोद्यम्य निपात्येत्युच्चार्यमाण उद्यमननिपातने एव हस्तोपि
तद्द्वारेणान्वयं प्राप्नोतीति सार्वजनीनमेतत् किं च कथंभावाकांक्षा नाम करणगतप्रकाराकां।
क्षा प्रकृतः प्रकारत्वाच्चिन्त्यसामान्यस्य भेदको विशेषः प्रकारः सामान्यं च क्रियारूपमेवाख्याते
नोच्यते यजेत स्वर्गकाम इत्यस्य हि अयमर्थः यागेन तथा कर्तव्यं यथा यागात्स्वर्गो भवतीति
क्रियासामान्यस्य च विशेषः क्रियैव भवति न हि ब्राह्मणविशेषः परिव्राजकादिर्ब्राह्मण एव भव ९५

15

ति एवं चक[illegible]रणागतिक्रियाविशेषाकांक्षाऽपरनामधेयं कथंभावाकांक्षायां क्रियैवान्वेती
त्युक्तं सच करणागतः क्रियाविशेषोन्वाधानादि ब्राह्मणतर्पणान्तक्रियारूप एवेत्युक्तं न।
स प्रकरणोत्तमग्रहणांतस्यच करणागतत्वं तदुपकारकत्वमेव तेन विनायागेनाऽपूर्वोत्पादनात्
नस्फुरयमननिष्पन्नव्यतिरेकेणारुणाद्येणाद्वैधीभावो जन्यते नत्सिद्धं कथंभावाकांक्षायां क्रिये।
वान्वेतीत्युक्तं अत एव दर्शादेवतयोर्यागसंपादनद्वारान्वयः सांप्रदायिकैरुक्तः विकृतौ चक
थंभावाकांक्षायामुपकारसंपादनमतिदिष्टमित्युक्तं यद्यपि कथंभावाकांक्षायां सिद्धवस्त्व
न्वयो ग्रंथस्यात् तदा संपादनपर्यवसानं भावनं ग्रन्थकाराणामनर्थकं स्यात् अतश्च क्रियया एव दृ
ष्टिकर्तव्यतात्वं कथंभावाकांक्षागृहीतस्येति कर्तव्यतात्वात् इति प्राहुः स च प्रकारत्वाविर्त्वात् क
तस्येति प्रकारोहीतिकर्तव्यताप्रकारस्य सामान्यस्य भेदको विशेष इत्युक्तं कर्तव्यस्यैव विशेषः कर्त
व्य एव भवतीति न सिद्धस्य वस्तुन इतिकर्तव्यतात्वं किंतु क्रियाया एव सिद्धस्य तु द्रव्यादेः केवलमं
गत्वं तदपि क्रमत्वादिनानन्तर्भावकरणात् यथाहुः नावान्तरक्रियायोगादृते वाक्योपकल्पितात्
तादृक्षे कथंभावे दृष्टे इति प्राहुतः क्रिया इति अत एव बर्हिर्देवसदनं दामीत्यादिमंत्राणां लिंगा

उ
१६

16

र्शत्वं तत्प्रकरणादित्युक्तं अर्थवादाधिकरणे सर्वपदसमाम्नाये केषुचिद्व्यपेक्षेतिकर्तव्यताका
भिधानसमान्वाभिप्रायेणैवं बहुग्रन्थस्वरसाञ्जस्याय तेष्वेति न निरूढप्रकरणं त्रिधा याया एव विनि
योजकमिति तच्च प्रकरणं द्विविधं महाप्रकरणमवान्तरप्रकरणं चेति तत्र फलभावनायाः प्रक
रणं महाप्रकरणं तच्च प्रयाजादीनां यागस्य तच्च प्रकृतावेव यत्र समग्राङ्गोपदेशः सा प्रकृतिः ।
यथा दर्शपूर्णमासादिः तत्र चोभयाकाङ्क्षारूपप्रकरणं संभवति स्वाकाङ्क्षानुपरमात् विकृतौ तु
न प्रकरणं संभवति यत्र न समग्राङ्गोपदेशः सा विकृतिः यथा सौर्यादिः तत्र च यान्यपूर्वाण्यङ्गानि
पठ्यन्ते उपहोमादीनि तेषां न प्रकरणं विनियोजकं तत्र यद्यपि तेषां किं भावयेदित्यस्त्याकाङ्क्षा
त तथापि प्रधानस्यैकथंभावाकाङ्क्षास्ति प्राकृतैरेवाङ्गैर्निराकाङ्क्षत्वात् न च प्राकृताङ्गानाम
त्रापठितत्वेनाप्रत्यक्षत्वादेतेषां तत्र पठितत्वेन प्रत्यक्षत्वादेवाकाङ्क्षोपशम इति वाच्यम् ते
षां च पठितत्वेऽप्यक्लृप्तोपकारत्वेन क्लृप्ताकाङ्क्षोपशमनेऽसामर्थ्यात् प्राकृतानां तु क्लृप्तोपका
रत्वेन तच्छमने सामर्थ्यात् न चात्र तेषामनुपस्थापकाभावः उपमितिलक्षणप्रमाणेन तेषामुप
स्थितत्वात् सौर्यवाक्ये हि दृष्टेऽोषधद्रव्यत्वेनैकदेवत्यत्वेन च सादृश्येनाग्नेययागस्तूपमीय
ते गवयदर्शनाद्गोरुपमानवत् तस्मिंश्चोपमिते तेन तद्धर्मा ज्ञायते सा चैवंशाभावना तत्र सौ
र्यवाक्ये भावनाया भाव्यकरणयोः सत्त्वादितिकर्तव्यताकाङ्क्षायामुपकारदृष्टभावेनाग्नेयेतिक उ
१६

दाग्नेयव १

तेष्वनातिदिश्यते सौर्ययागेन ब्रह्मवर्चसं भावयेदिति तथा च नयैवाकांक्षोपशमान्न विकृतेः प्रकरण
मस्ति अन्यतराकांक्षा स्वस्थानादेव चापूर्वांगग्रहणं न च प्राकृतांगग्रहणमेव विकृतौ प्रकरणात्
किं न स्यादिति वाच्यं तेषामपि प्रकृत्युपकारकतया कांक्षोपशमात् ननु प्राकृतानामंगानामा
कांक्षाभावेन तेषां विकृतिसंबंधः केवलं स्थानात्स्यात् अपूर्वाणां त्वाकांक्षासत्त्वाद्विकृतेरप्याकांक्षा कृत्वा
तेषां न संबंधः प्रकरणात्स्यात् प्रकरणं च स्थानाद्बलवदिति विनियोजकमित्यपूर्वाणामेव प्रथमं संबंधः
स्यान्न प्राकृतानामिति उच्यते सत्यं प्रकरणं बलवदिति विनियोजकं तत्रापि प्रमाणबलाबलात् प्रमेयब
लाबलस्याप्यायत्त्वादुक्तविधयोपस्थितत्वात्प्राकृतानामेव संबंधो युक्तः लघूपकारत्वात् नवैः
कृतानां कल्प्योपकारत्वात् विकृतेश्चोपकारकपदार्थाकांक्षा न पदार्थमात्रस्येति युक्तः प्रथमं
प्राकृतांगसंबंधः ननु तत्र विकृतौ प्रकरणं विनियोजकं यत्र विकृतौ प्राकृतांगानुवादेन विधीयते
यथौदुम्बरो यूपो भवतीति यूपानुवादेनौदुंबरत्वं तत्प्रकरणाद्दृश्यते ननु तत्प्रकरणाद्दृश्यते क्रि
यात्वात् क्रियायाः पवप्रकरणाग्राह्यत्वादिति चेत्सत्यं तथापि तावद्विधीयमानस्यौदुंबरस्यापेक्षा कां ल
क्षा किं [illegible] भावयेदिति न च यूपानुवादेन तस्य विधीयमानत्वाद्यूपस्य चादृष्टरूपत्वात्तेनैवौदुंबरत्व
स्यैताकांक्षा आहवनीयेनेवाधानस्येति वाच्यम् यूपस्य केवलादृष्टरूपत्वाभावात्तस्य हि तद्रूपत्वे
खादिरत्वादिकं केवलादृष्टार्थं स्यात् न च तत्संभवति तथा सति खादिराभावे प्रतिनिधित्वेन कद

ॐ २

17

रोपादानं न स्यात् अदृष्टार्थस्य प्रतिनिधेरभावात् नहि व्रीहियवजन्यसूक्ष्मादृष्टं कदाचिदन्यतो निष्पद्यते इत्यत्र प्रमाण
मस्ति अत एव नादृष्टार्थानां प्रतिनिधिः तदुक्तं न देवताग्निशब्दक्रियमन्यार्थत्वादिति प्रतिनिधित्वे
न चोपादानं खदिरादेः अंशरूपेषु तस्मान्न यूपस्य केवलादृष्टरूपत्वं अपि तु दृष्टादृष्टसंस्कारगुणो
यूप इति सांप्रदायिकाः एवं चोदुम्बरस्य न यूपमात्रेणानैराकांक्ष्यं दृष्टसंस्कारस्य प्रकारांतरेणापि सं
भवात् अतश्चौदुम्बरत्वस्याकांक्षाविहतेरप्यस्ति कथंभावाकांक्षा सा च तदा शाम्यति यदोप
कारास्तत्त्वेष्टभावेन च पदार्था अन्वीयंते न तूपकारमात्रान्वयेन शाम्यति अतश्च यथेंद्रियभाव
नायाः करणाकांक्षा दध्नः करणत्वेनान्वये जाते सिद्धस्य करणत्वानुपपत्त्या होमस्याश्रयत्वेनान्व
यं यावदनुवर्तते न तु दध्यन्वयमात्रेण निवर्तते आश्रयत्वेन च गृह्यमाणो होमः करणाकांक्षये
व गृह्यते इत्युक्तं तेन त्वाश्रयाकांक्षा नामश्च तत्रैवास्ति एवं च विहतेः कथंभावाकांक्षा नोपकारान्व
यमात्रेण निवर्तते उपकारदृष्टभावेन यावत्पदार्थान्वयमनुवर्तते अतश्चोपकारदृष्टभावेनाद
ह्यमाणाः पदार्थाः कथंभावाकांक्षयैव गृह्यंते तत्राह कृताः पदार्थाः कथंभावाकांक्षया गृह्या
माणा अपि न प्रकरणग्राह्याः प्रकृतस्तूपकारकत्वतया तेषामाकांक्षाभावात् औदुम्बरत्वादयस्तु
अन्यस्तूपकारकतया साकांक्षाः पश्चान्नियोजनदृष्टप्रदृष्टभावेन यावत्त्वादित्वमायाति तावद्ग्र
धीयंत इति युक्तं तेषां प्रकरणाद्ग्रहणं उभयाकांक्षासत्वात् यदि हि स्वपदृष्टभावेन त्वादित्वं वि

तं २

ह्निंस्यात् ततोविकृतेराकांक्षाभावादौडुंबरत्वंनप्रकरणग्राह्यंस्यात् नचैतदस्तिचोदकस्य
खादिरत्वाविषयत्वात् ननुयदियावत्खादिरत्वमायातितावदौडुंबरत्वंविधीयतेतदाते।
नखादिरत्वबाधोऽप्राप्तबाधःस्यात् नातीयबाधवत् तथाहि बाधोहिद्विविधः अप्राप्तबाधः
प्राप्तबाधश्चेति तत्रनातीयोबाधोऽप्राप्तबाधः तत्रहियावद्दुर्बलेनप्रमाणेनविनियोगःक
र्तुमारभ्यतेतावदेवबलवत्प्रमाणेनविनियोगःक्रियतइतितद्बोधितेनेतरबाधोऽप्राप्तबाधः
तो दुर्बलप्रमाणस्याप्रवृत्तत्वात् प्राकृतस्यत्वंगस्यविकृतौचोदकप्राप्तस्यप्रत्याम्नानादर्थलो
पात्प्रतिषेधाद्वायोबाधःसप्राप्तबाधः यथाप्राकृतानांकुशानांप्रतिकूलशराम्नानात् य
थावावघातस्यकृष्णलेषुवैतुष्यप्रयोजनलोपात् यथावापित्र्येष्टौहोतृवरणस्यहोता
रंनवृणीतेतिप्रतिषेधात् औडुंबरत्वेनचखादिरत्वबाधःप्राप्तबाधएववक्तव्यः पूर्वक्लृप्त।
न्यायेनचोदकस्यचखादिरत्वाविषयत्वेप्राप्त्यभावात्तदनुपपत्तिःस्यादिति उच्यते नातीं
यप्रमाणविनियुक्तेनेतरस्यबाधनंतावदप्राप्तबाधनं प्रकरणेचनातीयंतेननहिनियुक्तौ
डुंबरत्वेनेतरबाधनमप्राप्तबाधएव नहिविकृतेनप्राकृतबाधःप्राप्तबाधएवेतिकुलधर्मः
वस्तुतस्तुप्राप्तबाधएवायं नचखादिरत्वस्यचोदकाविषयत्वेनप्राप्त्यभावात्कथं[illegible]धःप्रा तद्वा[redacted]
प्तबाधः तद्विषयत्वेवातनैवनैराकांक्ष्यात्तौडुंबरत्वस्यप्रकरणेविनियोजकंस्यादितिवाच्यम्

१९

नहिप्राप्तबाधस्थलेचोदकेनपदार्थाःप्राप्यंतेनतथासतिप्राप्तस्यप्राप्तत्वेनबाधोनुस्यात् किंतर्हिता
नेवपदार्थान्विकृताःप्रापयंतियेविकृतौनबाध्यंतेतेचपदार्थाःप्रकृतिवद्भावेनप्राप्यंतइतिभ
वतितुरुषस्यभ्रांतिः यथाप्रकृतौकृतंतथाविकृतौकर्तव्यमितिसर्वेपदार्थाःप्राकृताःकर्त्त।
व्याइति अतश्चभ्रांतिप्राप्ताःस्वादिमत्वादयःप्रमाणप्रतिपन्नैरौडुंबरत्वादिभिर्बाध्यंतइतिभव
५ प्रति तितद्बाधःप्राप्तबाधः नचभ्रांतिपन्नेनवैधीआकांक्षानिवर्तयितुंशक्यते तस्मात्कृत्स्नमुभ।
याकांक्षारूपप्रकरणासंभवाद्विकृतौप्राकृतांगानुवादेनविधीयमानानामौडुंबरत्वादीनां।
प्रकरणंविनियोजकमिति एवंदृषदाज्येनानुयाजान्यजतीतिप्राकृतानुयाजानुवादेनविधी
यमानंदृषदाज्यमपिप्रकरणाद्विकृत्यंगमितिकेचिदाचार्याः अस्मत्तातचरणास्त्वेवमाहुः दृ
षदाज्यंहिअनुयाजानुवादेनविधीयतेतत्स्वरूपेचानर्थक्यप्राप्तौतेनैवविकृत्यपूर्वलक्षयितुंयुक्तं
विप्रकर्षात् किंतद्दीक्षणीयावाङ्गिःयमनूपायेनस्वापूर्वमेवलक्षयितुंयुक्तंसन्निकर्षात् अतए
वोत्पवनादीनांप्रोक्षणायपूर्वप्रयुक्तत्वमुक्तंनवमे अतश्चविधीयमानस्यदृषदाज्यस्यवाक्यप्र
तिपन्नेनानुयाजापूर्वेणैवनैराकांक्ष्यात्प्रकरणाद्विकृत्यपूर्वार्थत्वमिति वयंत्वंगीकृत्यापि।
विकृत्यपूर्वार्थत्वंब्रूमः भवतुवाविकृत्यपूर्वार्थत्वंदृषदाज्यस्यतथापिनप्रकरणंविनियोजकंभवतीति
रूपदृष्टभावेनहियावत्त्वादिरत्वमायातितावदौडुंबरत्वविधानादुभयाकांक्षासम्भवाद्धकृतः।

१५
१९

प्रकरणविनियोगः एवं यावदनूयाजदृष्टभावेनाज्यमायाति तावदेव यदिह पृषदाज्यं विधीये
त तदोभयाकांक्षासंभवात्प्रकरणविनियोगो भवेत् न त्वेतदस्ति नहि पृषदाज्यं नाम द्रव्यां
तरं किंचिदस्ति यदाज्यस्थानापन्नं विधीयेत श्रौडुंबरत्वमिव वा खादिरत्वस्थानापन्नं पृष
दाज्यस्य पृषन्मणिरित्यादौ चित्रता वाचित्वेन दृष्टत्वात्पृषदाज्य प्राकृतस्य चित्राज्यवाचित्वात्
अत एव निगदेष्वाज्यपानित्येव वचनात् एवं न तु पृषदाज्यपानित्युक्तं न च यावत्प्राकृताज्य
मायाति तावदेव चित्राज्यविधानात्प्रकरणविनियोगः संभवतीति वाच्यम् नहि पृष
दाज्यग्रहेन चित्रतागुणविशिष्टमाज्यं विधीयते विशिष्टविधाने गौरवापत्तेः किंतु प्राकृ
ताज्यानुवादेन चित्रतागुणमात्रं विधीयते लोहितोष्णीषा ऋत्विजः प्रचरन्तीतिवत् लउ
कं दधामचतुर्थचरणांत्येन चातुर्गुण्यप्राप्तत्वादिति प्राकृतस्यैवाज्यस्य चित्रतागुणमा
त्रविधानमिति चूमास्तदीपिका एवं च विकृतेः प्राकृतेनाज्येन कृतोपकारे प्राप्तानुयाजे
ए॥ नैराकांक्ष्ये पश्चाद्विधीयमानस्य चित्रतागुणस्योपदेशमात्रपूर्वाङ्गवत्प्रकरणविनियोज
कं संभवति यदि हि प्राकृतस्य कस्यचित्कृणस्य स्थाने चित्रतागुणो विधीयेत तदा सगुणो
यावदायाति तावद्विकृतेर्नैराकांक्ष्याभावाच्चित्रतागुणस्य च तावदेव विधानादुभयाकां

२०

तासंभवात्प्रकरणाद्विनियोगोभवेत् नचनारिष्ठाःप्राकृतोगणोक्तिप्राज्यस्यानु
याजानांचविकृतौगणात्प्रागेवविधानात्तत्स्थानापन्नत्वाभावाच्च नचा
ज्यप्रहृष्टभावेनयावत्प्राकृतंनिर्गुणत्वमायातितावदेवास्यविधानात्प्रकरणसं
भवइतिवाच्यम् निर्गुणत्वस्याविहितत्वेनपाणिकंडूयनवदनंगत्वाद्विकृतौ
तदाकांक्षाभावात् तथाहि ज्योतिष्टोमेदक्षिणादानेसमयेविहितकस्यवि
षाणत्यागस्यहितत्रादिष्टेचोदकप्राप्तस्यप्रथमेह्निअवध्यानमन्त्रैरुक्तदक्षिणा
दानसर्वकालीनैःपदार्थैःकस्यविषाणाकंडूयनस्यप्राप्तस्यविहितत्वेनापेक्षि
त्वात् ज्योतिष्टोमेचदक्षिणादानोत्तरकालपाणिकंडूयनदृष्टमपिहिरात्रादि
ष्वप्रथमेह्निअनुष्ठीयमानैर्दक्षिणादानोत्तरकालीनैःपदार्थैर्नापेक्ष्यते तस्य
प्रकृतौअप्यसिद्धत्वेनातिदेशाद्भावीयत्वादिति एवंनिर्गुणत्वस्याविहितत्वेनविकृते
रपेक्षानास्तीति तस्मादुभयाकाङ्क्षायाअसंभवान्नष्टदाज्यस्यप्रकरणाद्विनि
योगःसंभवतीत्यलमतिविस्तरेण तस्मिन्महाप्रकरणेप्रकृतावेवविनियो
जकं विकृतौतुयत्प्रकृतदृष्टार्थेषुगात्रवादेनविधीयतेतस्यविनियोजकं नच

२०

केवलंविधीयमानस्याप्यङ्गस्येति यत्तुविहितावपिप्राकृतधर्मानुवादेनविधीय
मानयोर्धर्मयोरंतरालेऽपूर्वमंगंकेवलंपठ्यते तदपिप्रकरणेनविज्ञायते यद्यपिवि
हितेकथंभावाकांक्षाप्राकृतैरेवांगैःशाम्यतितथापियत्रप्राकृतांगानुवादेनधर्मा
विधानंतत्रनहियावदनुवर्ततितावत्कथंभावाकांक्षाननिवर्तते अतोविहितेष्व
कांक्षावत्वादंतरालेविहितस्यापिअपूर्वस्यांगस्यभाव्याकांक्षासत्वाद्यत्नंतस्यप्रकर
णाद्धितादर्थ्यमेव यथाचमनहोमेषुतेहिप्राकृतांगानुवादेनविधीयमानयोर्धर्म
योरंतरालेविधीयंतेऽयुक्तंतत्रसन्नाराद्विस्यास्तानावत् फलभावनायामंतराले
यदंगभावनायाःप्रकरणान्तरत्वात्तत्प्रकरणं तथाभिक्रमणादीनांप्रयाजादिषुवि
नियोजकं तच्चसंदंशेनज्ञायते तदभावेऽविशेषात्सर्वेषांफलभावनाकथंभावेनग्र
हणात् संदंशोनामएकांगानुवादेनविधीयमानयोरंगयोरंतरालेविहितत्वंयथाभि
क्रमणंतद्धिसमानयतेऽपभृतज्जुह्वादिनाप्रयाजानुवादेनकिंचिदंगंविधायवि
धीयतेपश्चादपिप्रयाजानुवादेनयोवैप्रयाजानांमिथुनंवेदेत्यादिनाकिंचिदंगं

कु
२१

विधीयते अतः प्रयाजानां मध्ये पठितमभिक्रमणं न दर्शं भवतीति न कथंभावाकां-
क्षाभ्यम्भृशांतेः यथाहुः परप्रकरणस्थानामंगोपकारादिभिस्त्रिभिः ज्ञातेऽप्यनश्व
नैरेव संदंशेन न दिष्टपतुरिति नवांगभावनायाः कथंभावाकांक्षासामान्यकथंप्रया-
जभावना कथंभावेनाभिक्रमणं दृष्टमिति वाच्यं भावनासाम्येन सर्वत्र कथंभावा
कांक्षायाः सत्वात्प्रयाजेषु पूर्ववत्त्वाय यागोपकारं भावयेदित्युक्ते यो नाम न जानाति प्र
याजैः पूर्वं कुर्वतस्सम्भवत्येव कथंभावाकांक्षा कथमेभिः पूर्वं कर्तव्यमिति साच संदं
शपठितैर्वाचनिकैः स्मार्तैश्चाचमनादिभिः शाम्यतीति तस्मादेवञ्च स्वरूपनिष्पादकत्वेन
दर्विहोमन्यायेन निवर्तते दर्विहोमेषु हि स्वरूपनिष्पादनातिरिक्तस्तद्व्यापारो न
श्रूयते नाप्यतिदेशेन तत्प्राप्तिर्यागीयानां धर्माणां तावन्नातिदेशो यागत्वेन होमत्वे
न वैलक्षण्यात् नापि हौमीयानां कस्य होमस्य धर्माः कस्मिन्होमे प्रवर्तन्त इति विशेष
निर्णये प्रमाणाभावात् अतो धर्मप्राप्त्यभावाद्दर्विहोमैरिष्टं भावयेत्कथमिति तद-
पन्नाप्याकांक्षा स्वरूपनिष्पादनैव शाम्यति एवं येष्वंगेषु संदंशाप्रभावास्तत्रोप

ज्ञाप्याकांक्षातेनैवनिवर्त्तितेनतत्सर्वस्यानद्भावलक्षणायक्रमक्रमभिक्रमणं
प्रयाजांगमिति तत्त्वेदमवांतरप्रकरणंमहाप्रकरणाद्बलीयः संदंशपतितानां(
धर्माणांकैमर्थ्याकांक्षायांप्रधानापूर्वात्प्रयाजाद्यपूर्वस्यझटित्युपस्थितेरिति ।
प्रकृतमनुसरामः तत्सिद्धस्यभयविधस्यप्रकरणस्यविनियोजकत्वं तदिदं(
स्थानादपिप्रमाणात्प्रबलं यत्रहिस्थानादंगत्वंतत्रान्यतरस्यप्रकरणेनेतरेणनिरा
कांक्षत्वं नचसाकांक्षंनिराकांक्षेणसंबद्धुंयोग्यंविनाकांक्षोत्थापनेन अतश्चा
न्यतराकांक्षयायावदुभयाकांक्षारूपप्रकरणकल्पनद्वारावाक्यादिकल्पयितुमा
रभ्यतेझटितितावत्प्रकरणेनवाक्यादिकंकल्पयित्वाविनियोगःक्रियतइतिस्थाना
त्प्रकरणस्यबलीयस्त्वं अतएवविदेवनादयोधर्माअभिषेचनीयसन्निधौपठि
ताअपिनाभिषेचनीयस्यांगं तेषांतदंगत्वंचस्थानाद्भवेत्तच्चप्रकरणान्न अभिषेच
नीयस्यात्मकवाक्षाचोदितत्वेनज्योतिष्टोमविकारत्वात्प्राकृतैरेवधर्मैर्निराकां
क्षत्वात् किंतुप्रकरणाद्राजसूयांगं तत्रराजसूयेनस्वाराज्यकामोयजेतेत्यत्रराज ते
सूयशब्दस्तावन्नामधेयत्वात्सामान्यात्परंत्रयोयज्ञान्योनततैवप्रवर्तते नचदर्शपूर्णा

डों
२२

माभ्यां स्वर्गकामो यजेतेत्यत्र यथा दर्शपूर्णमासपदं नामधेयमपि नाख्यात-
परतंत्रं नत्रैव यजेतेत्याख्यातमविशेषात्सर्वानेव प्रकृतानाग्नेयादीन्प्रयाजादीं-
श्चाभिधातुं समर्थं दर्शपूर्णमासपदं त्वाग्नेयादीनेवं वदति न सर्वान् तच्च न तदाख्या-
तपरतंत्रं तथा राजसूयपदमपि किं न स्यादिति वाच्यम् प्रसिद्धेन हि पदेनाप्रसिद्धं नी-
यते यथाङ्गैः पदमज्ञातसंदिग्धं प्रसिद्धैः सह प्रयुक्तमिति निर्णीयते निरूढत्वेन स्वार्था-
दपनीयत इति दर्शपूर्णमासपदं च कालनिमित्ततद्योगाच्चाग्नेयादिष्वप्रतिवाक्यैरव-
गतः अतस्तद्वाचित्वेन दर्शपूर्णमासपदं प्रसिद्धं नचाग्नेयादीनां बहुत्वाद्द्विवच-
नानत्वमस्यानुपपन्नमिति वाच्यम् विहिताकमद्वयसिद्धसमुदायद्वयाभिप्रायेण त-
दुपपत्तेः एवंच दर्शपूर्णमासपदस्याग्नेयादिवाचित्वे निर्णीते यजेतेत्याख्यातमपि ता-
नेव वदति नहि तदङ्गेषु स्वार्थं यागो भवति राजसूयपदं त्वनिर्णीतार्थं अतस्तदाख्या-
तपरतंत्रमेव तच्चाविशेषात्सर्वानिष्टिपशुसोमान्प्रविधत्ते तत्तंत्रत्वाद्राजसूयपदमपि
तानेव वदति नच राजसूयशब्दस्य राजा सूयते यत्रेति व्युत्पत्त्या सोमाभिषवनिमित्त-
त्वात्तस्य च सोमसमभिव्याहृतेनेति वाक्येन सोमयागेष्ववगतत्वात्तद्वाचित्वमेव नेष्टिपशु-

२२

वाचित्वमितिवाच्यं नह्यभिषेचनीयादिसोमयागेष्वभिषवः ग्रन्यत्रेणावाक्येनचो।
दितोस्तिनह्यावयस्यज्योतिष्टोमेसत्वादतिदेशात्संबंधोवगतइतिचेन्न अतिदेशस्य
फलसंबंधोत्तरकालीनत्वेनराजसूयेनस्वाराज्यकामोयजेतेत्येतद्वाक्यार्थावगत्युत्तर
कालीनत्वात् अनेनहिवाक्येनफलसंबंधेबोधितेपश्चात्कथंभावाकांक्षायामतिदे।
शकल्पनात् अतस्ततःप्रागेवैतद्वाक्यार्थावगतिनीयस्तदाचाभिषवस्यानवगतत्वा
द्राजसूयपदमप्रसिद्धार्थमेव अतएवराजसूयपदमव्युत्पन्नमस्मत्कर्णेशाहूवा।
दिसकलसांप्रदायिकैः एवंचाप्रसिद्धार्थत्वेनाख्यातपरतंत्रत्वाद्राजसूयपदेनेष्टि
पशुसोमयागाउच्यंते तेचनैस्तैःप्राप्तैर्धर्मैर्निराकांक्षाइतितत्प्रकरणांविदेव।
नादीनांराजसूयेविनियोजकत्वभयाकांक्षायाअभावात् किंचप्रातिस्विकरूपे न
नैराकांक्ष्येपिनराजसूयत्वेनरूपेणनैराकांक्ष्यमितिवाच्यम् आकांक्षाहूयेप्रमा।
णाभावात् किंचप्रातिस्विकरूपेयोकथंभावाकांक्षासापिफलसंबंधोत्तरकालं
सचराजसूयत्वेनत्रप्रातिस्विकरूपेराजसूयत्वेनफलसंबंधेउत्पन्नायांकथंभावा
कांक्षायाविदेवनादिभिःप्रातेरतिदेशाकल्पनमेवनस्यात् यदिहिसामान्यरूपेण

६ रञ

२३

मानिस्वकरूपेणाचफलसंबंधविधायिवाक्यद्वयंभवेत्तदापुनस्तेनापि आकांक्षा
क्षयात्प्रमाणेनाविदेवनादीनामनिर्देशिकानांचांगानांसंबंधोनभवतीति तस्मा
त्प्रकरणंधर्मनैराकांक्ष्यात्त्वविदेवनादीनांप्रकरणांविनियोजकमितिचेत् सत्यं अ
नुपवसाम्प्रदायिकैर्विदेवनादीनांसंदंशपाठदर्शितः राजसूयत्वपुरस्कारेणायंधर्मोवि
धीयते राजसूयाययज्ञायतनातीत्येवमादयस्तन्मध्येविदेवनादयः पठ्यन्ते अतः
सोमसवेराजसूयांगाभ्यपाजान्तर्वादेनविधीयमानधर्ममध्येपठितस्याजमानस्यक्र
मणावत् तस्मात्प्रकरणांगं विदेवनादीनांप्रकरणात् राजसूयांगत्वमितितन्निसिद्धंप्रक
रणस्यस्थानाद्बलीयस्त्वमिति देशसामान्यंस्थानंतच्चद्विविधम् पाठसादेश्य
मनुष्ठानसादेश्यंचेति यथाहुः तत्रक्रमोद्विधैवेष्टोदेशसामान्यलक्षणः पाठा
नुष्ठानसादेश्यंविनियोगस्यकारणमिति स्थानंतत्रसम्बन्धेपुनर्यथातरपाठसादेश्य
मपिद्विविधं यथासंख्यपाठः सन्निधिपाठश्चेति तत्रैन्द्राग्नमेकादशकपालंनिर्व
पेदैन्द्राग्नंवैश्वानरंद्वादशकपालंनिर्वपेदितिएवंक्रमविहितेषुइन्द्राग्नीरोचनादिवइत्यादीनां
याज्यानुवाक्यामंत्राणांयथासंख्यंप्रथमस्यप्रथमंद्वितीयस्यद्वितीयमित्येवंयोविनि

रञ

योगः स यथा सांख्यपाठात्प्रथमपठितमंत्रस्य हि कैमर्थ्याकांक्षायां प्रथमतो विहि
तं कर्मैव प्रथममनुपतिष्ठते समानदेशत्वात् यानि तु वैकृतान्यंगानि प्राकृतान्नुवा
देन विहितानि तेषां विकृतापूर्वत्वं सन्निधिपाठात् तेषां हि कैमर्थ्याकांक्षायां फल
वद्विकृत्यपूर्वमेव भाव्यत्वेन संबध्यते उपस्थितत्वात् अत एव ते पुनर्विश्वजिन्न्याया
वत्ताः स्वतंत्रफलार्थत्वे विकृतिसन्निधिपाठानर्थक्यापत्तेश्च पशुधर्माणामग्नीषो
मीयार्थत्वं अनुष्ठानसादेश्यात् औपवसथ्येऽह्नि अग्नीषोमीयः पशुरनुष्ठीयते तत्र
सन्निवद्दिने ते धर्माः पठ्यंते अतस्तेषां कैमर्थ्याकांक्षायामनुष्ठेयत्वेनोपस्थितं।
पश्वपूर्वमेव भाव्यत्वेन संबध्यते अतो युक्तं अनुष्ठानसादेश्यात्तदर्थत्वं तेषाम्
न च पाठसादेश्यादेव तत्त्किं न स्यादिति वाच्यं अग्नीषोमीयस्य पशोः क्रयसन्निधौ
पाठात् न च क्रयसन्निधौ तस्य पाठेन तदनुष्ठानमपि तत्र स्यादिति वाच्यं स एष हि देव
त्यः पशुरौपवसथ्येऽह्नि आलब्धव्य इति वचनात् तदनुपपत्तेः न च स्थानात्प्रकरण
स्य बलीयस्त्वेन पशुधर्माणां ज्योतिष्टोमार्थत्वमेव किं न स्यादिति वाच्यं न स्यसा।

मुं
२४

मयामात्वेनपशुधर्मग्रहणोऽयोग्यत्वात् अतश्चानर्थमतिहतानांविपरीतंबलाबलमि
तिन्यायात्स्थानात्पशुयागार्थत्वमेवधर्माणांयुक्तं नचतेषांतदर्थत्वंप्रकरणादेवस्या
दितिवाच्यं अग्नीषोमीयवपाभावाकांक्षायाःऽऽपकारैःप्राकृतधर्मैरेवोपशांतत्वा
त् सहिसवनीयपशुयागप्रकृतिकः उभयोःपशुप्रभवत्वसामान्यात् तदुक्तं सान्नाय्यवान्
प्रभवत्वादिति सान्नाय्यंदधिपयसी तत्रपशुयागःपयोयागप्रकृतिकःसान्नाय्यपशु
प्रभवत्वात् अतश्चोदकप्राप्तैस्तद्धर्मैर्निराकांक्षत्वात्पशुयागे[illegible]
धर्माणांप्रकरणंविनियोजकं किंतुस्थानमेव तदेवंनिरूपणःस्थानविनियोगः तत्रस
माख्यातःप्रबलंस्थानविनियोगोहिपदार्थयोर्देशसामान्यलक्षणसंबंधःअत्यन्तः
समाख्याविनियोगेतुसंबंधेनप्रत्यक्षःपदार्थयोर्निर्देशात् नचसासंबंधवाचि
कायौगिकानांशब्दानांद्रव्यवाचकत्वेनसंबंधावाचकत्वात् तथाहि समाख्यासंबंध
सामान्यवाचिकानतद्विशेषवाचिकाऽवश्यात् नायं तदुक्तौप्रयोजनाभावात् सर्वयौगि
कशब्दानांपर्यायतापत्तेश्चहितीयेऽपिसंबंधिनोवाच्यौनतुतेनसंबंधेविशेषाभा

२४

वात्प्रतिपत्तिसंभवेणात् तदप्रतिपत्तेश्च अतश्चावयवसंबंधिवाचकत्वं समाम्नायाव
गत्यं तथा च न संबंधवाचिकात्वं संबंधिप्रतिपत्त्यैव वाक्यार्थप्रतिपत्तिन्यायेन तत्प्रति
पत्तिसंभवेत्तत्र शक्तिकल्पने गौरवात् यथाहुः सर्वत्र यौगिकैः शब्दैर्द्रव्यमेव विधीय
ते न हि संबंधवाच्यत्वं संभवति गौरवादिति तथा पाकं तु पचिरेवाह कर्तारं प्रत्यय
स्तथा पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचिदिति तथा च समाख्यानसंबंधवा
चिका होतृचमसेत्यादिका न वैदिकी समाख्यानिषादस्थपतिन्यायवत्तत्पदार्थसंबं
धवाचिकानामपि वाक्यवत् नृहोदयिका तस्याः पदत्वेनाप्रमाणत्वात् पौरोडाशिक
मित्यादिसमाख्यानं श्रुतिलिङ्गबलालौकिकत्वेन पुरुषप्रत्ययसापेक्षत्वात् कोंड्गोचरत्वे
नतत्पदार्थगोचरत्वाच्च कांडवाचकत्वमपि न कांडत्वेनावगतपौरोडाशिकत्वादिनैव न
संकल्पनीयाहोतृचमसवाचकोपि गौणत्वेन तदिति किं तर्हि एककार्यकारित्वेनैव व्याख्यानवि
नियोगेन पदार्थयोर्विशेषणपुरस्कारेणैव संबंधः प्रत्यक्षप्रमाणप्रतिपन्नः अतश्च स
माख्यामनुपलभमानं न मनयोः पदार्थयोः संबंधोस्तीति यावत्कल्पते तावत्प्रत्यक्षप्रति
पन्नेन संबंधेन परस्पराकांक्षात्तदभावे च संबंधानुपपत्तेः कल्पितसंबंधेन च यावद्विशि

दि॰
२५

स्त्राकांतादिकस्यनामावदंस्त्राकांतयावाक्यादिवस्यनयाविनियोगः क्रियतइतिसि
द्धस्यानस्यसमाख्यातः आवृत्य अनपवृत्तधनमंत्रः सान्नाय्यपात्राणांपाठसादेश्यपात्रव
पौरोडाशिकसमाख्ययापुरोडाशपात्राणामिति समाख्यायौगिकःशब्दः साचद्विधा
वैदिकीलौकिकीच तत्रहोतृश्चमसभक्षणांगत्वंहोतृश्चमसइतिवैदिक्यासमाख्ययाऽ
दा ध्वर्योस्तत्तत्पदार्थांगत्वं लौकिक्याआध्वर्यवमितिसमाख्ययेतिसंक्षेपः एवंनिरूपितानि
संक्षेपतः श्रुत्यादीनिषट्प्रमाणानि एतत्सहकृतेनविनियोगविधिनासमिदादिभिरु
पकारस्वरूपाणीमासाभ्यांयजेतेत्येवंरूपेणयानिविनियुज्यंते तान्यंगानि तानिद्विवि
धानि सिद्धरूपाणिक्रियारूपाणिचेति तत्रसिद्धानिजातिद्रव्यसंख्यादीनितानिदृष्टा
र्थान्येव क्रियारूपाणिचद्विविधानि गुणकर्माणिप्रधानकर्माणिचेति एतान्येवसन्नि
पत्योपकारकाणिआराद्उपकारकाणीतिचोच्यंते तत्रकर्मांगद्रव्याद्युद्देशेनविधीयमा
नंकर्मसन्निपत्योपकारकं यथावघातप्रोक्षणादि तच्चदृष्टार्थमदृष्टार्थंचदृष्टादृष्टार्थं
चदृष्टार्थमवघातादिअदृष्टार्थंप्रोक्षणादिदृष्टादृष्टार्थंपशुपुरोडाशयागादि तद्धि
द्रव्यत्यागांशेनादृष्टंदेवतोद्देशेनचदेवतासंस्मरणंदृष्टंकरोति दृष्टमेवचाप्रधानकर्मस्तु

प्रतिपत्तिकर्म ४

एते तच्च सन्निपत्योपकारकं द्विविधं उपयोक्ष्यमाणार्थमुपयुक्तार्थं चेति तत्रा
वघातप्रोक्षणादिकमुपयोक्ष्यमाणार्थं व्रीहीणां यागे उपयोक्ष्यमाणत्वात् प्रतिपत्ति
कर्म त्विडाभक्षणादिकमुपयुक्तपुरोडाशसंस्कारकमुपयुक्तस्य कीर्णाकरतो निर्वर्तकत्व
मेऽउपयुक्तसंस्कारार्थं च उपयोक्ष्यमाणसंस्कारार्थाद्दुर्बलमुपयुक्तापेक्षयोपयो
क्ष्यमाणेऽभ्यर्हितत्वात् अत एव प्रापणानि निष्कासे उदयनीयमनुनिर्वपतीत्यत्र
निष्कासस्य निर्वापार्थत्वं न तु तस्य तदर्थत्वं निष्कासस्योपयुक्तत्वादित्युक्तमेका
दशे तच्च सन्निपत्योपकारकमारादुपकारकाद्बलीयः नन्ववघातादिर्भवतु
नाम बलीयस्तस्य दृष्टार्थत्वात् आरादुपकारकस्य चादृष्टार्थत्वात् दृष्टे च संभ
वत्यदृष्टस्यान्याय्यत्वात् प्रोक्षणादि सन्निपत्योपकारकं तु कथं बलीयः उभ
योरदृष्टार्थत्वाविशेषात् किं चारादुपकारकं साक्षात्प्रधानाङ्गं तस्यान्योद्देशेन
विधानात् सन्निपत्योपकारकं तु अङ्गाङ्गं कर्माङ्गव्रीह्याद्युद्देशेन विधानादङ्गा
ङ्गापेक्षया साक्षादङ्गं बलीयः अङ्गगुणविरोधे तादर्थ्यादिति न्यायात् अत ए

वषट्कारापञ्चनासोमेनयजेतसोमावास्यायांपौर्णमास्यांवायजेतेत्यः विशेष।
विधानेपिपर्वानुग्रहः सोमयागस्यैवक्रियतेनतदीक्षणीयादेः अतः सन्निपातो कथं
पकारकस्यबलीयस्त्वमुच्यते सत्यप्युद्दिष्टार्थत्वाविशेषसन्निपत्योपकारकमारा
दुपकारकाद्बलीयः सन्निपत्योपकारकेहिकर्मण्युपकार्योपकारकयोर्व्रीहिप्रोक्षण
याःसंबंधोवाक्यात्‌कल्प्यः उपकारमात्रेणकल्प्य आरादुपकारकस्यलेनदर्शपूर्ण
मासप्रयाजयोःसंबंधः कल्प्यः उपकारोपि किंचारादुपकारकस्यलेहिप्रकरणं।
विनियोजकं इतरत्रव्रीहीन्प्रोक्षतीतिवाक्यमेवव्रीहिपदेनापूर्वसाधनत्वलक्षणांकृ
त्वाक्रतौविनियोजकमितिबलीयस्त्वं पडभ्यं अंगासमाविरोधेनादर्श्यादितिन्या
येनदुर्बलत्वमिति तस्मात्‌ नहिव्रीह्याद्यकदेशेनविधीयमानंप्रोक्षणादितितदर्थं
भवतितत्स्वरूपेआनर्थक्यात्‌ किंतुसंस्कारद्वाराक्रत्वर्थमेवसन्निपत्योपकार।
काणामपूर्वग्रहणात्वस्यचैवरूपमाणत्वात्‌ अतउभयविधमप्यंगजातंक
त्वर्थमेवेतिनांगागणविरोधस्यायावतारः दीक्षणीयादेः पर्वानुग्रहस्तुदीक्षा।

णीयापूर्वप्रवृत्तस्य तदपूर्वसाधकत्वात् अतोऽङ्गानां साक्षात्प्रधानांगेन प्रधानेऽपूर्वा
नुग्रहेण सर्वाण्युपकारकत्वमिति तत्सिद्धं सन्निपत्योपकारकस्याराडुपकारकाद्बलीयस्त्वं
अतएवकस्याणोस्यादेवावृत्तिं जुहोतीति विहितास्यादेवावृत्तिर्यूपस्यैवनस्याद
हागयूपसंस्कारार्थो देवस्त्वा सविता मध्वानक्त्विति मन्त्रः अत्र विदेशनिधानमिव देवस्त्वसं
स्कारार्थेन तत्स्यादेवावृत्तिरारादुपकारकेष्वङ्गं दृश्यमेवेति दिक् इत्थमाप्यत्र्यादिप्रप
केवलं विधीयमानं कर्म आरादुपकारकं यथा प्रयाजादि तदेवं निरूपितं हि
विधमप्यङ्गजातं तच्च न यागादिस्वरूपप्रयुक्तं स्वरूपेणानर्थकत्वात् तदंतरेणाऽ
पि तत्सिद्धेः किंत्वपूर्वप्रयुक्तमेव नहि तदंतरेणापूर्वं भवतीत्यत्र किंचित्प्रमाण
मस्तीति तत्साहाय्यार्थत्वात् न चैवं प्राधान्याददृष्टार्थं फलप्रयुक्तमेवाङ्गं तस्या
पि तिवाच्यं फलभावनायां यागस्य करणत्वाद् अङ्गानां च करणानुग्राहकत्वात् तद
र्थत्वेऽपि तत्र चानर्थक्यप्रसक्तौ तेन स्वापूर्वमेवोपस्थाप्यते सन्निकर्षात् दीक्षणी
यादिष्वाहेनैव तदपूर्वं न तु फलमुपस्थाप्यते विप्रकर्षात् अतो न तत्प्रयुक्तत्वम
गानां अतएवाङ्गानां स्वःस्ववरान्नेमितिमंत्रो विकृतावूहितव्य इत्युक्तं न वमे ।

ॐ २२

फलदेवतयोश्चैतस्य फलस्य प्रयुक्तत्वेन सौर्यादिविकृतिषु स्वर्गरूपफलाभावान्नं
त्रैनप्रवर्त्तितन्तत्तासां चोदितव्यः स्यादिति तत्सिद्धमंगानामन्यप्रयुक्तत्वान्त
पर्यन्ते पूर्वप्रयुक्तत्वं तत्रापि सन्निपत्योपकारकाणां द्रव्यदेवतासंस्कारद्वारा यागा
स्वरूपप्रयोगाद्युत्पत्त्यपूर्वार्थत्वं अतएवोक्तंयथधर्मावघातादीनामाज्येनप्रहृतिरिति
षामाग्नेयापूर्वप्रयुक्तत्वादाज्यस्य तदर्थत्वाभावादित्युक्तं तृतीये आरादुपकार
काणां तु स्वरूपेऽनुपयोगात्परमापूर्वार्थत्वं तत्रोत्पत्त्यपूर्वस्य यागस्वरूपानुष्ठा।
नानंतरमेवोत्पद्यमानत्वात्सन्निपत्योपकारकाणां पूर्वं जातानां तदुत्पत्तावुपयोगः
उत्तरांगानां तु तेषां तत्स्थितावुपयोगः परमापूर्वस्य तु सांगप्रयोगानुष्ठानानंतर
मेवोत्पद्यमानत्वात्सर्वेषामारादुपकारकाणां तदुत्पत्तौ प्रयोगबहिर्भूतस्य च तत
स्थितावुपयोगः यथा बृहस्पतिसवस्य वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति।
वाजपेयोत्तरकालसंगत्वेन विहितस्य वाजपेयापूर्वस्थितावुपयोगः तस्य प्रागेवो
त्पन्नत्वादित्युक्तं चतुर्थे तत्सिद्धं सर्वेषामंगानामपूर्वार्थत्वं प्रकृतमनुसरामः तदे
वं निरूपितः संक्षेपतो विनियोगविधिः प्रयोगप्राशुभावबोधको विधिः प्रयो।

गविधिः सचांगवाक्यैकवाक्यतामापन्नःप्रधानविधिरेव सहिसांगंप्रधानम
नुष्ठापयन्विलंबेप्रमाणाभावादविलंबापरपर्यायंप्रयोगप्राशुभावंविधत्ते
नचविलंबवदविलंबेपिप्रमाणाभावइतिवाच्यम् विलंबेह्यंगप्रधानविध्येक
वाक्यतावगततत्साहित्यानुपपत्तिःप्रसज्यते नहिविलंबेनक्रियमाणयोःपदा
र्थयोःसहकृतमितिसाहित्यंव्यवहरंति नचैवंसाहित्यानुपपत्त्यासमानकाल
त्वमेवस्यान्नत्वविलंबः अतएवप्रधानेनपूर्वोत्तरकालक्रियमाणपदार्थयोरविलं
बेनकृतमितिव्यवहारादितिवाच्यम् अनेकपदार्थानामेकस्मिन्कालेऽनुष्ठानाऽ
नुपपत्तेः नचतावत्कर्तृसंपादनेनानुष्ठानंकिंनस्यादितिवाच्यं तस्यैतस्ययज्ञक्रतो
श्चत्वारऋत्विजइत्यादिनाकर्तृणांनियतत्वात् तस्मादंगवाक्यैकवाक्यतामाप
न्नःप्रधानविधिरेकवाक्यतावगततत्साहित्यविरुद्धंकविधयापककालानुष्ठा
नानुपपत्तेरविलंबंविधत्तइतिसिद्धं प्रयोगप्राशुभावंकोविधिःप्रयोगविधिरिति बोध्य
सचाविलंबोनियतेक्रमेआश्रीयमाणेसंभवति अन्यथाहिकिमेतदनंतरमेतत्कर्तव्य
मेतदनंतरंवेतिप्रयोगविक्षेपापत्तेः अतःप्रयोगविधिरेवस्वविधेयप्रयोगप्राशुभा

मी० २८

मावसिद्धत्वंर्थनियतंक्रममपिपदार्थविशेषान्तत्याविधत्ते तत्रक्रमोनामविनाति।
विशेषः पौर्वापर्यरूपोवा तत्रषट्प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्या
ख्यानि तत्रक्रमवचनंश्रुतिः नचहिविधकेवलक्रमपरंतद्विशिष्टपदार्थपरंचे
ति तत्रवेदंकृत्वावेदिंकरोतीति केवलक्रमपरंवेदिकरणादेर्वचनान्तरेणाविहित
त्वात् वषट्कर्तुः प्रथमभक्ष इति तत्रक्रमविशिष्टपदार्थपरं एकप्रसरताभङ्गभये
नभक्षानुवादेनक्रममात्रस्यविधानसम्भवत्वात् सेयंश्रुतिरितरप्रमाणापेक्षयाब
लवती तेषांवचनकल्पनद्वाराक्रमप्रमाणत्वात् अतएवाश्विनस्यपाठक्रमात्तृती
यस्थानेग्रहणाम्नातोप्याश्विनोदशमोगृह्यतइति वचनाद्दशमस्थानेग्रहणमित्युक्तं
अर्थस्तुप्रयोजनवशेननिर्णयः सोऽर्थक्रमः यथाग्निहोत्रयवागूपाकयोः अत्रहि।
यवाग्वाहोमार्थत्वेनतत्पाकः प्रयोजनवशेनपूर्वमनुष्ठीयते सत्यपिपाठक्रमाद्बलवा ८
न् यथापाठंप्रयोगेत्वनुष्ठानेऽदृष्टप्रयोजनबाधोऽदृष्टार्थत्वंचस्यात् नहिहोमानन्तरंक्रि
यमाणस्यकिंचिद्दृष्टप्रयोजनमस्ति पदार्थबोधकवाक्यानांयःक्रमःसपाठक्रमः
तस्माच्चपदार्थानांक्रमआश्रीयते येनहिक्रमेणवाक्यानिपठितानितेनैवक्रमेण

श्री

धीनामर्थप्रत्ययंजनयंति यथार्थप्रत्ययंचपदार्थानामनुष्ठानानांसच पाठोद्विविधः
मंत्रपाठोब्राह्मणपाठश्चेति तत्राग्नेयाग्नीषोमीययोस्तत्तद्याज्यानुवाक्याक्रमा
द्यःक्रमस्सआश्रीयतेसमंत्रपाठात् सचायंमंत्रपाठोब्राह्मणपाठाद्बलवाननुष्ठानेब्रा
ह्मणवाक्यापेक्षायांमंत्रवाक्यस्यांतरंगत्वात् ब्राह्मणवाक्यैर्हिप्रयोगाद्बहिरेवेदम
वंकर्तव्यमित्येवमवबोध्यकृतार्थमितिनपुनःप्रयोगकालेव्याप्रियंते मंत्राःपुनस्तु
प्रयोजनाःप्रयोगसमवेतार्थस्मारकाइतिवक्ष्यामः तेनानुष्ठानक्रमस्यस्मरणक्र
माधीनत्वात्क्रमस्यचमंत्रक्रमाधीनत्वादंतरंगोमंत्रपाठक्रमस्तस्मादितिबलवान् अ
तएवाग्नेयाग्नीषोमीययोर्ब्राह्मणपाठादेवग्नीषोमीयानुष्ठानंपूर्वमाग्नेयानुष्ठा
५१ नस्मिन्नेवंक्रमबाधित्वामंत्रपाठादेवाग्नेयानुष्ठानंपश्चादग्नीषोमीयस्येत्येवंक्रमद
र्शकं प्रयाजानांसमिधोयजतितनूनपातंयजतीत्येवंविधायकवाक्यक्रमाद्यःक्रमः
सब्राह्मणपाठक्रमः अत्रचयद्यपिब्राह्मणवाक्यान्यर्थविधायककृतार्थानितथापिप्र
याजानांस्मारकांतरस्याभावात्तान्येवस्मारकत्वेनस्वीक्रियंते तथाचयेनक्रमेणाना

पु २४

स्याधीतानि तेनैव क्रमेणार्थस्मरणं जनयन्तीति युक्तं तेनैव क्रमेणैषामनुष्ठानमिति न
त्विष्टप्रयाजानां ब्राह्मणपाठक्रमात्क्रमइति नन्वत्र प्रयाजेषु प्रयोगसमवेतार्थस्मारक
त्वं विधायकत्वेन कृतार्थानां ब्राह्मणवाक्यानां किमिति स्वीक्रियते प्रयोगसमवेतार्थ
स्मारकाणां याज्यामन्त्राणामाग्नेयादिष्विवात्रापि सत्त्वात् न चैतेषां देवतास्मारकत्वा
त्कर्मस्मारकत्वेन ब्राह्मणवाक्यं स्वीक्रियत इति वाच्यं आग्नेयादिष्वपि कर्मस्मारकत्वे
न तत्स्वीकारापत्तेः न चेष्टापत्तिः तथा सति ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वं न स्यात्
तद्बलीयस्त्वे हि मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वमित्यस्यादस्मारकत्वं हेतुः यदि
कर्म चैं स्मारकत्वं ब्राह्मणवाक्यस्य स्वीक्रियते तदा प्रधानस्मारकत्वेन ब्राह्मणवाक्यस्यान्तरंग
त्वादङ्गभूतदेवतास्मारकत्वेन च मन्त्राणां बहिरङ्गत्वान्मन्त्रपाठाद्ब्राह्मणपाठस्यैव ब
लीयस्त्वं स्यात् तथा च मन्त्रतस्त्वविरोधे स्यादिति पाञ्चमिकाधिकरणविरोधः तत्र हि
ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वादाग्नेयानुष्ठानं पश्चादग्नीषोमीयस्येत्यु
क्तं अथाग्नेयादिषु याज्यामन्त्रा अपवरदेवताप्रकाशनद्वारा कर्मप्रकाशका अप्युपमान

२४

द्रव्योद्देशपरत्वस्वरूपत्वाद्देवतात्वस्येति चेत् तत्सं प्रयाजेषु तत्रापि हि याज्यामंत्रा।
देवताप्रकाशकाः प्रयाजेषु देवतायां मांत्रवर्णिकत्वात् तथा च प्रयाजेषु याज्या
मंत्राणां देवताप्रकाशनद्वारा कर्मप्रकाशकत्वात् क्रमो मंत्रपाठादेव स्यात् न तु।
ब्राह्मणपाठक्रमात् न च मंत्रपाठस्यान्यादृशत्वात् प्रयाजक्रमो ब्राह्मणपाठक्रमादेवे
ति वाच्यम् अन्यादृशत्वेन स्वेव क्रमस्यानुष्ठानं स्यात् मंत्रक्रमस्य बलीयस्त्वात् अ
भ्यासाधिकरणे च वार्तिककृता क्रमस्यैवं लिंगाच्च मंत्रवर्णोपात्तानां प्रयाजेषु याज्या
मंत्राणां क्रमविनियोग उक्तः नवमे तंत्ररत्ने समिधो अग्न आज्यस्य व्यंत्वित्यादिभिः क्र।
मप्रकरणाग्रामैस्त्रिर्द्देवतागुणत्वेन समर्प्यते तदुक्तं मंत्राणामन्यादृशक्रमत्वे तद
नुपपत्तिः स्यात् तत्कथं प्रयाजेषु ब्राह्मणपाठक्रम उच्यते सत्यमेतत् तथापि यत्रार्थ
स्मारका मंत्रा न सन्त्येव यथा तूष्णीं विहितेषु कर्मसु तेषां क्रमो ब्राह्मणपाठक्रमात् त
त्रैतेषामेव प्रयोगसमवेतार्थस्मारकत्वात् प्रयाजे तु दाशर्णां तद्भूतत्वाच्चिंतायां तत्र ब्रा
ह्मणवाक्यानां प्रयोगसमवेतार्थस्मारकत्वाभावात् यथाहुरर्थवादस्य चरणो वार्तिक
काराः प्रयाजादिवाक्यान्यर्थसमर्पकचरितार्थानि स्वरूपसंस्पर्शे सत्यपि प्रयोज्यतां

30

नप्रतिपद्यंतइतितस्मात्समंत्रककर्मणांपाठक्रमोमंत्रपाठात् असमंत्रकपाठक्रमः
स्तब्राह्मणपाठक्रमादेवेतिदिक् प्रकृतौनानादेशानांपदार्थानांविकृतौवचना
देकस्मिन्देशेऽनुष्ठानेकर्तव्येयस्यदेशेऽनुष्ठीयंतेतस्यप्रथममनुष्ठानमितरयोश्च
पश्चादित्ययंक्रमःस्थानक्रमः स्थानंनामोपस्थितिः यस्यहिदेशेऽनुष्ठीयंतेतत्स
र्वतनेपदार्थेनकृतेस्यैवप्रथममुपस्थितेर्भवतीतियुक्तंतस्यप्रथममनुष्ठानं अत
एवसाद्यस्क्रेऽग्नीषोमीयसवनानुबंध्यानांसवनीयदेशेसहानुष्ठानेकर्तव्येऽग्ना
दौसवनीयपश्वोरनुष्ठानंतस्मिन्देशेआश्विनग्रहणानंतरंसवनीयस्यैवप्रथममु
पस्थितेः इतरयोश्चपश्चात् तथाहि ज्योतिष्टोमेत्रयःपशुयागाः अग्नीषोमीयः
सवनीयअनुबंध्यश्चेति तेचभिन्नदेशाः अग्नीषोमीयस्त्वौपवसथ्येऽहिसवनीयः
सुत्याकालेऽनुबंध्यस्त्ववसाने साद्यस्क्रोनामसोमयागविशेषः सचाप्रकृताज्ज्योतिष्टो
मविकारः अतस्तत्रापिपशुयागाः साद्यस्क्रेचोदकप्राप्तास्तेषांचतत्रसाहित्यम्
श्रुतंसहपशूनालभेतइति तच्चसाहित्यंसवनीयदेशेतस्यप्रधानप्रत्यासत्तेः स्थाना
तिक्रमसाम्याच्चसवनीयदेशेसहानुष्ठानेक्रियमाणेऽग्नीषोमीयानुबंध्ययोःस्वस्व

स्थानातिक्रममात्रं भवति अग्नीषोमीये देशेऽनुष्ठाने क्रियमाणे सवनीयस्य स्वस्था
नातिक्रममात्रं आनुबन्ध्यस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्रमश्च स्यात् ।
एवमानुबन्ध्ये देशे आग्नीषोमीयस्य द्रष्टव्यं तथा च सवनीये देशे सर्वेषामनुष्ठाने
कर्तव्ये सवनीयस्य प्रथममनुष्ठानं आश्विनग्रहणानन्तरमस्य विहितत्वात् तथा च
[illegible] हि सवनीयदेशः प्रकृतो आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं
सवनीयं पशुमुपाकरोतीत्याश्विनग्रहणानन्तरं तस्य विहितत्वात् तथा च साद्यस्क्रे
ष्वाश्विनग्रहणोत्कृते सवनीय एवोपस्थितो भवतीति युक्तं तस्य स्थाने प्रथममनुष्ठा
नं तत्र योऽयं पश्वादिषु क्रमः प्रधानक्रमेणायोगांगानां क्रमश्चाश्रीयते स मुख्यक्रमः
येन हि क्रमेण प्रधानानि क्रियन्ते तेनैव चेत् क्रमेण तेषामङ्गान्यनुष्ठीयन्ते तदा सर्वेषामङ्गा
नां स्वप्रधानैस्तुल्यं व्यवधानं भवति व्युत्क्रमेणान्वनुष्ठाने केषांचिदङ्गानां स्वैः प्रधानैर
ल्पं तत्र व्यवधानमन्येषामल्पं तद्व्यवधानं स्यात् तथा युक्तं प्रयोगविध्यवगतसाहि
त्यबाधापत्तेः अतः प्रधानक्रमोऽपि अङ्गक्रमे हेतुः अत एव प्रयाजशेषेणादौ आग्नेय

मी॰

न्या ३१

31

हविषोभिघारणंपश्चादैंद्रस्यदध्नः आग्नेययागैंद्रयागयोःपौर्वापर्य्यात् अत्रहि
द्वयोरभिघारणयोःतेनतेनप्रधानेनतत्त्वंपक्रांतमितिमव्यवधानंभवति आग्नेयह
विरभिघारणमाग्नेययागयोरैंद्रयागाद्धविरभिघारणेनव्यवधानात् ऐंद्रयागहविर
भिघारणेऐंद्रयागयोश्चाग्नेययागेनव्यवधानात् अतश्चादावाग्नेयहविरभिघारणं
ततऐंद्रस्यहविषः ततआग्नेययागः ततश्चैंद्रोयागइत्येवंक्रमोमुख्यक्रमात्सिद्धोभ
वति यदित्वादावैंद्रहविषोभिघारणंततआग्नेयस्यक्रियेततदायाज्यानुवाक्याक्र
मवशादादावाग्नेयस्यानुष्ठानादाग्नेययागतदंगहविरभिघारणयोरत्यंतमव्यवधा
नमैंद्रयागतदंगहविरभिघारणयोरत्यंतमव्यवधानंस्यात्तच्चनयुक्तं अतोमुक्रमःप्र
याजशेषाभिघारणस्यमुख्यक्रमात्क्रमइति सचायंमुख्यक्रमःपाठक्रमाद्दुर्बलः
मुख्यक्रमोहिप्रमाणांतरसापेक्षप्रधानक्रमममतिपत्तिसापेक्षतयाविलंबितप्रतिप
त्तिः पाठक्रमस्तुनिरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतयानतथेतिबलवान् ।
अतएवाग्नेयोपांशुयाजाग्नीषोमीयानांक्रमेणानुष्ठीयमानानामप्युपांशुयाजो

न्या

उपनिर्वापो मुख्यक्रमात्पूर्वमनुष्ठीयते तस्य दुर्बलत्वात् पाठक्रमात्तु पश्चादनुष्ठी
यते तस्य प्रबलत्वादिति सचायं मुख्यक्रमः प्रवृत्तिक्रमाद्बलवान् प्रवृत्तिक्रमो ह्या
श्रीयमाणो बहूनामङ्गानां प्रधानविप्रकर्षो भवति अस्मिंस्त्वाश्रीयमाणे सन्निक
र्षः यथा दर्शपूर्णमासयोरादावाग्नेयानुष्ठानं ततश्च सान्नाय्यस्य तद्धर्माश्च के
चित्पूर्वमनुष्ठीयन्ते तत्र यदि प्रवृत्तिक्रममाश्रित्य तद्धर्माः सर्वे पूर्वमनुष्ठीयेरन् ततः
आग्नेयधर्मास्तदा तद्धर्माणां स्वप्रधानेन सह द्वाभ्यामाग्नेयधर्मैस्तदनुष्ठानाभ्यां विप्र
कर्षः स्यात् यदा त्वसान्नाय्यधर्माणां केषांचित्पूर्वमनुष्ठानेऽपि अन्ये सर्वे मुख्यक्रममा
श्रित्याग्नेयधर्मानुष्ठानानन्तरमनुष्ठीयन्ते तदा सर्वेषामाग्नेयधर्मसान्नाय्यधर्माणा
मेकैकेन विजातीयेन व्यवधानं भवति आग्नेयधर्माणां स्वप्रधानेन सह सान्नाय्यधर्मै
र्व्यवधानात्सान्नाय्यधर्माणां च स्वप्रधानेन सहाग्नेयानुष्ठानेन व्यवधानादिति न विप्र
कर्षः तस्मान्मुख्यक्रमः प्रवृत्तिक्रमाद्बलवान् सह प्रयुज्यमानेषु प्रधानेषु सन्निपाति
नामङ्गानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमा

३२

धःक्रमःसमहतिक्रमः यथा प्राजापत्यांगेषु प्राजापत्याः वैश्वदेवीं कृत्वा प्राजापत्यै
श्चरंतीति वाक्येन तत्तीया निर्दिष्टास्ते निर्वर्त्यत्वनाका एककालत्वेन विहिताः अत
स्तेषां तदंगानां चोपकरणनियोजनप्रभृतीनां साहित्यं संपादनीयं तत्र प्राजापत्या
नां संप्रतिपन्नदेवताकत्वेनैकस्मिन्काले ऽनुष्ठानादुपपद्यते साहित्यं तदंगानां चैका
स्मिन्काले ऽनुष्ठानमशक्यं न ह्यनेकेषां पशूनामुपाकरणमेकस्मिन्काले कर्तुं शक्यं
अतस्तेषां साहित्यमव्यवधानेनानुष्ठानात्संपाद्यमेकस्योपाकरणं कृत्वा परस्योप
काकरणमिति अतः प्राजापत्येष्वेकं पदार्थं सर्वत्रानुष्ठाय द्वितीयः पदार्थोऽनुष्ठेयः त
त्र प्रथमपदार्थानुष्ठानं कस्माच्चित्पशोरारभ्य कर्तव्यं द्वितीयस्तु पदार्थो येन क्र
मेण प्रथमोऽनुष्ठितस्तेनैवानुष्ठेयः प्रयोगविध्यवगतस्य मिथोंगसाहित्यस्योपपत्त
ये प्रयोगविधिना हि देवतदंगानामुपाकरणनियोजनादीनां मिथः साहित्यमानंत
र्यापरपर्यायं विहितं तच्च साहित्यं संवननीयपशोश्चोदकेन प्राप्तं तस्य प्राणिद्रव्यकत्वे
नैदेव विकृतत्वात्संवननीयाश्चैकादशिनेषु प्राप्तं सम्पाकालत्वसामान्यात् तेष्वपश्वप्रा

३२

जापत्येष्वग्नीषोमीयेषु सामान्यात्प्राजापत्येषु च प्रतिपशुयागभेदाच्चोदकात्प्रियं
ये ते अतश्चोदकात्तेषु पश्वङ्गभूतानामुपाकरणनियोजनादीनां साहित्यमानन्तर्याऽ
परपर्यायं प्राप्ते अतएकस्य पशोरुपाकरणानन्तरमेव नियोजनं चोदकबलात्क
र्तव्यत्वेन प्राप्तं तन्न क्रियते अपच्छेदवचनाद्वागतसर्वपश्वङ्गसाहित्याद्युपपत्तेः अ
नेकस्मिन्प्रयोगे उपाकरणे कृते तेन तदनन्तरमेव कर्तव्यत्वेन प्राप्तमपि पशुनियो
जनं न क्रियते अपच्छेदवचनबलात्तु पश्वन्तरेषूपाकरणमेव क्रियते कृते तु तेषूपा को३४१९
करणे प्रथमपशोर्नियोजनस्य तद्वितीयोपाकरणेन व्यवधाने प्रमाणाभावात्
प्रथमपशावेव नियोजनं कार्यं अतश्च येन क्रमेणोपाकरणं कृतं तेनैव क्रमेण
नियोजनं कार्यं एवं चानन्तर्यमुपाकरणानां स्वस्वनियोजनैस्तुल्यं षोडशप्रातरणौ
व्यवधानं भवति अन्यथा केषांचिदत्यन्तव्यवधानं केषांचिदल्पव्यवधानं स्यात्
तच्चानयुक्तं तस्माद्येन क्रमेण प्रथमः पदार्थोऽनुष्ठितस्तेनैव द्वितीयोऽनुष्ठेयः त
त्सिद्धं प्रथमानुष्ठितपदार्थक्रमाद्द्वितीयपदार्थक्रमः समप्रधानक्रम इति त

ई
रु

33

देवंतावेपत्तोनिरूपितः षड्विधक्रमनिरूपणेनप्रयोगव्यापारः फलस्वामिबोधको
विधिरधिकारविधिः फलस्वाम्यंचकर्मजन्यफलभोक्तृत्वं सचयजेतस्वर्गका
मइत्येवंरूपः अनेनहिस्वर्गमुद्दिश्ययागंविदधतास्वर्गकामस्ययागजन्यफल
भोक्तृत्वंप्रतिपाद्यते यस्याहिताग्नेरग्निर्गृहान्दहेत्सोऽग्नयेक्षामवतेष्टाकपालंपु।
रोडाशंनिर्वपेदित्यादिभिस्त्वनित्यादाहादैनिमित्तेकर्मविदधद्भिर्निमित्तवतःकर्म
जन्यपापक्षयरूपफलस्वाम्यंप्रतिपाद्यते तच्चफलस्वाम्यंतस्यैवयोऽधिकारिविशे
षणविशिष्टः अधिकारिविशेषणंचतद्देवयत्पुरुषविशेषणत्वेनश्रुतं अतएव
राजाराजसूयेनस्वाराज्यकामोयजेतेत्यनेनस्वाराज्यमुद्दिश्यराजसूयंविदधतापि
नस्वाराज्यकाममात्रस्यतत्फलभोक्तृत्वंप्रतिपाद्यते किंतुराज्ञःसतस्तत्कामस्यकिं।
चित्पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणंभवति यथाध्ययनविधि।
सिद्धाविद्या अग्निसाध्येषुचकर्मस्वाधानसिद्धाग्निवत्ता सामर्थ्यंचैतेषांपुरुष।
विशेषणत्वेनाश्रवणेप्यधिकारिविशेषणत्वमस्त्येव अशक्तविधीनांज्ञानादौ।

३३

पश्चान्नेमिविनाध्ययनविधिसिद्धज्ञानवंतंसंप्रवृत्तेः अग्निसाध्यकर्मणांचाग्न्यऽ
पेक्षत्वेननहिद्विधीनामाधानसिद्धाग्निवंतंप्रत्येवप्रवृत्तेः अतएवचशूद्रस्यनया
गादावधिकारः तस्याध्ययनविधिसिद्धज्ञानाभावादाधानसिद्धाग्न्यभावाच्चाध्य
यनस्योपनीताधिकारत्वात् उपनयनस्यचाष्टवर्षंब्राह्मणमुपनयीतेत्यादिना
त्रैवर्णिकाधिकारत्वात् आधानस्यापिवसंतेब्राह्मणोग्नीनादधीतेत्यादिस्त्रैवर्णि
काधिकारत्वात् यद्यपिचवर्षासुरथकारोग्नीनादधीतेत्यनेनरथकारस्यसौधन्व
नापरपर्यायस्याधानंविहितंयोगारूढेर्वलीयस्त्वात् तथापिनास्येतरकर्म
स्वधिकारः अध्ययनविधिसिद्धज्ञानाभावात् नचतदभावेआधानेपिकथमस
धिकारः तदनुष्ठानस्यतत्साध्यत्वादितिवाच्यम् तस्याध्ययनविधिसिद्धज्ञानेपि
वर्षासुरथकारोग्नीनादधीतेत्यनेनविधिनाधानमात्रोपयोगिकज्ञानाक्षेपणात्
अन्यथाप्रत्तस्यैवविधेरनुपपत्तेः अतश्चरथकारस्याधानमात्रेधिकारेपिनेतर
कर्मस्वधिकारोविद्याभावात् एवंचतदाधानेनाग्निसंस्कारार्थसंस्कृतानाग्नेनवो।

३४

तस्त्रोपयोग्याभावात् किंतु तत्साध्यानं लौकिकाग्निसाध्यकं विश्वजिन्न्यायेन स्व
र्गफलं च स्वतंत्रमेव प्रधानकर्म विधीयते अग्नीनिति च द्वितीया सक्तून्जुहोती
तिवत्तृतीयार्थेति प्रकृतमनुसरामः न हि सिद्धस्य शूद्रस्याध्ययनविधिसिद्धज्ञाना
भावादाधानसिद्ध्यग्न्यभावाच्च नैताग्नेयकर्मस्वधिकार इति नन्वेवं स्त्रियोऽधिका
रोऽन्याय्यः तस्या अध्ययनप्रतिषेधेन तद्विधिसिद्धज्ञानाभावात् नन्वनास्त्येवेति वा
च्यं यजेत स्वर्गकाम इत्यादौ स्वर्गकामपदस्योद्देश्यसमर्पकत्वेन पुंस्त्वस्योद्देश्यवि
शेषणत्वात् ग्रहैकत्ववदविवक्षितत्वेन स्त्रियोऽधिकारस्य साधितत्वादिति चेत्
सत्यं अधिकारः साधितो न तु स्वातन्त्र्येण न स्त्री स्वातंत्र्यमर्हतीत्यादिना तस्य निषिद्ध
त्वात् स्वातंत्र्येणाकर्तृत्वे प्रयोगद्वयस्यापि वैगुण्यापत्तेश्च यजमानप्रयोगे पत्नीक
र्तृकाज्यावेक्षणादिलोपात् पत्नीप्रयोगे च यजमानकर्तृकाज्यावेक्षणादिलोपात् अतो
दंपत्योः सहाधिकारः सहाधिकारत्वे यजमानविषयैव पत्न्या अपि कार्यसिद्धेर्नेत्रा
नं विना तस्याधिकारेऽनुपपत्तिः पाणिग्रहणात्तु सहत्वं कर्मसु तथा पुण्यफलेष्विति

३४

वचनेनस्त्रियोधिकारनिर्णायश्चनिषादस्थपतेरिवाध्ययनविधिसिद्धज्ञानविरहि
णोपिएतयानिषादस्थपतिंयाजयेदितिवचनान्निषादेष्ठांनिषादस्थपतिश्चाहे
हिनिषादंचतंस्थपतिंचेतिकर्मधारयोनतुनिषादानांस्थपतिरितिषष्ठीतत्पुरुषः दा
षष्ठ्यर्थेलक्षणापत्तेः एतावांस्तुविशेषः निषादस्याध्ययनविधिसिद्धज्ञाना।
भावेनैतस्यैवविधेस्तत्कर्मौपयिकज्ञानाक्षेपकत्वं पत्न्यास्तुतादृशज्ञानाभावेपि
यजमानेनसहाधिकारात्तस्यचतादृशज्ञानवत्वाभावेनैवचतस्याःकार्यसिद्धेर्नोत्तर
विधित्रयविधीनांज्ञानाक्षेपकत्वं येनपत्नीमात्रकर्तृकाःपदार्थाआज्यावेक्षणा
द्यस्तेज्ञानंविनाशक्यानुष्ठानाइतितद्विधीनांतदाक्षेपकत्वंस्वीक्रियतइति नतुसि
द्धंअध्ययनविधिसिद्धज्ञानस्याधानसिद्धाग्निवत्तयाधानोत्तरकर्मस्वधिकारिवि
शेषणत्वं एवंसामर्थ्यस्याप्यधिकारिविशेषणत्वं असमर्थंप्रतिविध्यप्रवृत्तेः।
आख्यातानामर्थंब्रुवतांशक्तिःसहकारिणीतिन्यायात तच्चसामर्थ्यंकाम्येकर्म
ण्यंगप्रधानविषयंनत्वंगासमर्थःप्रधानमात्रसमर्थश्चकाम्येऽधिकारीप्रधानविधे

रंगविधेरेवत्वावगतापन्नस्य सांगकर्मसमर्थप्रत्येव प्रवृत्तेः यथाविनियोगमधिकारा
त् यदि समर्थप्रत्येव प्रवृत्तौ कयाचित्क्रुत्याविरोधः स्यात् तदा समर्थस्याप्यधिकारः स्या
त् नचविरोधोस्ति स्वर्गकामश्रुतेः समर्थप्रत्येव प्रवृत्तौ विरोधाभावात् अत्रतु तासमर्थप्र
तिप्रवृत्तौ प्रधानविधेरंगवाक्यैकवाक्यतयापन्नसांगसमाहितस्य स्वबाधापत्तेर्नित्यवत्कृ
तानामंगानां पाक्षिकत्वप्रसंगाच्च अतः सांगप्रयोगे समर्थस्यैव काम्ये कर्मण्यधिका
रः नित्यकर्मणां त्वंगेषु यथाशक्तिन्यायः तानि हि यावज्जीवश्रुत्या यावज्जीवं कर्तव्यत्वे
न चोदितानि न च यावज्जीवं केनापि सांगाः प्रयोगाः कर्तुं शक्यन्ते अतो नित्यकर्मसु प्र
धानमात्रसमर्थोऽधिकारी अंगानि तु यावन्ति कर्तुं शक्यन्ते तावन्ति कार्याणीत्यास्तां वह्
मास्तरिभिः पराक्रांतत्वात् तस्मिंश्च फलस्वाम्यबोधको विधिरधिकारविधिरिति तदेवं
छा निरूपितं चतुर्विधं विधिनिरूपणेन विधेः प्रयोजनवदर्थपर्यवसानं मंत्राणां च प्रयोगसमवे
तार्थस्मारकत्वेन दृष्टार्थत्वे संभवति अदृष्टस्याप्रामाण्यत्वात् न च दृष्टस्य प्र
कारान्तरेणापि संभवात् मंत्राम्नानमनर्थकं मंत्रैरेव स्मर्त्तव्यमिति नियमविधानात्

प्रमाणात् साधनत्वं यस्य पक्षप्राप्तावप्राप्तस्य साधनस्य प्राप्तता पक्षप्राप्तायां यो विधिः स
नियमविधिः यथाहुः विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ
परिसंख्येति गीयते इति अस्यार्थः यस्य पदार्थत्वं प्रमाणान्तरेणाप्राप्तं तस्य तदर्थत्वे
न यो विधिः सोऽपूर्वविधिः यथा यजेत स्वर्गकाम इत्यादिः यागस्य हि स्वर्गार्थत्वं न प्र
माणान्तरेण ज्ञायते किं त्वनेनैव विधिनेति भवत्ययमपूर्वविधिः पक्षे प्राप्तस्य तु यो विधिः
स नियमविधिः यथा व्रीहीनवहन्तीत्यादिः अनेन हि विधिनावघातस्य न वैतुष्यार्थ
त्वं बोध्यते अन्वयव्यतिरेकसिद्धत्वात् किं तु नियमः स चाप्राप्तांशपूरणं वैतुष्यस्य हि
नानोपायसाध्यत्वाद्यस्यां दशायामवघातं परित्यज्योपायान्तरं ग्रहीतुमारभ्यते ता
स्यां दशायामवघातस्याप्राप्तत्वेन तद्विपक्षेऽप्राप्तस्यावघातस्यावघातविधानमिति या
वत् अपूर्वविधावपि अत्यन्ताप्राप्तं यागविधानमिति उभयस्य युगपत्प्राप्तावितरव्या
वृत्तिपरो यो विधिः स परिसंख्याविधिः यथा पञ्च पञ्चनखा भक्ष्या इतीदं हि वाक्यं न भ
क्षणविधिपरं तस्य रागतः प्राप्तत्वात् नापि नियमपरं पंचनखापंचनखभक्षणस्य युग

धानात्मकमप्राप्तांशपूरणमेवानेन विधिना क्रियते अतश्च नियमविधौ अप्राप्तांशपूरणात्मको नियम
एव वाक्यार्थः ८

पक्षाभेः पक्षेऽप्राप्त्यभावात् अतश्शशप्रमुखपंचभक्षणानिवृत्तिपरमिति भवति परिसंख्यावि।
धिः साच परिसंख्या हि त्रिविधा श्रौती लाक्षणिकी चेति तत्राद्यैवावयंतीत्यत्र श्रौती प
रिसंख्यैवकारेण पठ्यमानानतिरिक्तेत्यत्राहहितेरभिधानात् पंचपंचनखा भक्ष्या इत्य
त्र तु लाक्षणिकी इतरनिवृत्तिवाचकस्य पदस्याभावात् अत एवैषा त्रिदोषग्रस्ता दो
षत्रयं च स्वार्थहानिरश्रुतकल्पना प्राप्तबाधश्च श्रुतस्य पंचनखभक्षणस्य हानात् अ
श्रुतापंचनखभक्षणनिवृत्तिकल्पनात् प्राप्तस्य पंचनखभक्षणस्य बाधनादिति।
अस्मिंश्च दोषत्रये दोषद्वयं शाब्दनिष्ठं प्राप्तबाधस्तु दोषोऽर्थनिष्ठ इति दिक् तत्सिद्धं
मंत्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणान्मंत्राम्नानमनर्थकं अतश्च पुमंसमंत्रा
णां प्रयोगसमवेतार्थस्मारकतयार्थवत्वं तथा ये मंत्रा यत्र पठितास्तेषां तत्र यद्यर्थप्र
काशनप्रयोजनं संभवति तदा तत्रैव विनियोगः येषां तु न संभवति तेषां यत्र संभव
ति तत्रोत्कर्षः यथा पूषानुमंत्रेण मंत्राणामित्युक्तं येषां क्वापि न संभवति तदुच्चारण
स्य वगान्यादृष्टार्थत्वं सर्वथापि तत्तेषां नानर्थक्यमिति नामधेयानां विधेयार्थपरि

च्छेदकत्वयार्थवत्वं तथापि उद्भिदा यजेत पशुकाम इत्यत्र हि उद्भिच्छब्दो यागनामधे
यं तेन च विधेयार्थपरिच्छेदः क्रियते अनेन हि वाक्येनाप्राप्तत्वात्फलोद्देशेन यागो
विधीयते यागसामान्यस्य चाविधेयत्वाद्यागविशेष एव विधीयते तत्र कोऽसौ विशे
प्रा षइत्यपेक्षायामुद्भिच्छब्दादुद्भिदाख्यो याग इति ज्ञायते उद्भिदा यागेनेति सामाना
धिकरण्येन नामधेयान्वयात् तस्य च यजिना सामानाधिकरण्येन नीलोत्पला
दिशब्दवत् तत्र ह्युत्पलशब्दस्यार्थादुत्पलादन्यो नीलशब्दस्य वाच्यार्थोऽस्ति नील
गुणः लक्षणया तु नीलशब्दस्य द्रव्यपरत्वेन सामानाधिकरण्यं उद्भिच्छब्दस्य तु य
ज्यर्थगतयागविशेषान्तरो वाच्योऽर्थोऽस्ति विशेषवाचित्वात्तस्य अतश्चार्थेन तद्वा
चित्वाभावेन नामधेयस्य नीलशब्दवत्सामानाधिकरण्यं किं तर्हि वैश्वदेव्यामिक्षे
त्यत्रामिक्षापदवद्वैश्वदेवीशब्दस्य हि देवतातद्धितान्तत्वात् तद्धितस्य च हि सास्य देव
तेति सर्वनाम्नार्थस्मरणात्सर्वनाम्नां चोपस्थितविशेषवाचित्वेन विशेषपरत्वं तत्र
कोऽसौ वैश्वदेवीशब्दोपात्तो विशेष इत्यपेक्षायामामिक्षापदसान्निध्यादामिक्षारूपो वि

ऽपदत्वमवगम्यते यथाहुः आमिक्षां देवतायुक्तां वदत्यैवैष तद्धितः आमिक्षाप
दसान्निध्यात्तस्यैव विषयार्पणमिति तथा अन्यैवोपपदस्यार्थः सर्वनाम्नां प्रती
यते तद्धितलिङ्गेनैव ग्रहणामेकवाक्यतेति तस्मात् यथा वैश्वदेवीशब्दोपात्त
विशेषणसमर्पकत्वेनामिक्षापदस्य वैश्वदेवीशब्देन सामानाधिकरण्यं एवं सामान्य
स्याविधेयत्वात् यजपदगतस्य यागविशेषसमर्पकत्वेन नामधेयस्य उद्भिदा सामाना
धिकरण्यं तल्लिङ्गं नामधेयानां विधेयार्थपरिच्छेदकतयार्थवत्त्वं यथाहुः याग
विशेषसिद्धेस्तदधीनत्वादिति नामधेयत्वं च निमित्तचतुष्टयात् मत्वर्थलक्षणा
भयाद्वाक्यभेदभयात् तत्प्रख्यशास्त्रात् तद्व्यपदेशाच्चेति तत्रोद्भिदा यजेत पशुकाम इ
त्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात् तथाहि उद्भिच्छब्दस्य
गुणसमर्पकत्वे यागानुवादेन तावन्न गुणविधानं युज्यते फलपदानर्थक्यापत्तेः
न चानेन वाक्येन फलं प्रति यागविधानं तस्मिंश्च गुणविधानं युज्यते वाक्यभेदा
पत्तेः नापि गुणफलसंबंधविधानं संभवति परपदार्थविधानेन विप्रकृष्टार्थविधा

नापकोः धात्वर्थस्य स्वरूपेणाविधानात् तदुद्देशेन वाऽन्यस्य कस्यचिद्विधा
नाज्ञातोत्पत्तपदार्थोपनेयस्य यज्यानर्थक्यापनेयस्य नहि तद्दानेन करणांसम
र्पकेन गुणस्य करणत्वेनान्वयात् नापि फलं प्रत्यो भाव्यत्वेनान्वयात् अथ गुण
फलसंबंधविधाने यागस्याश्रयत्वेन संबंध इति चेन्न यजेतेत्यत्राश्रयवाचक
पदाभावात् अथ सिद्धांते करणत्वमिवाश्रयत्वमपि लक्ष्यमिति चेन्न आ
श्रयत्वापेक्षया करणत्वस्य लघुत्वेन तल्लक्षणायाएव युक्तत्वात् फलाय विधी
यमानत्वात् फलाय विधीयमानो गुणो यत्र कारकतामापद्यते सच्चाश्रय
११ त्वं वाश्रयत्वं कर्तृत्वं च निष्कृष्टाशाकिरिति लाघवं किंच गुणफलसंबन्ध
विधाने करणीभूतो गुणास्तन्निष्ठं वा करणत्वं फलोद्देशेन विधेयं तत्राद्यपक्षे
करणत्वस्य गुणोपसर्जनत्वेन प्रतीतिर्लक्षणायैव वाच्यात्वनीय याग्यन्यया
गम्यमानार्थत्वात्प्राधान्येनोपस्थितेः यद्यपि गुणनिष्ठकरणं फलोद्देशेन वि
धेयं तदापि फलभावनायां करणत्वेनान्वययोग्यगुणनिष्ठकरणत्वोपस्थि

कृ ३२

निलक्षणायैववाच्यात्तृतीयाभिहितस्य करणत्वात्मकस्य क्रियान्वययोग्यस्य क
रणत्वेनान्वययोग्यत्वात्करणग्राहेणाभिहितं करणकारकं तत्त्वेनान्वययोग्यं
नात्तृतीयाभिहितकरणग्राह्यादिवत्तृतीयान्तस्तृतीयोत्पत्तिप्रसंगात् अतश्च कर
णत्वेनान्वययोग्यगुणनिष्ठकरणत्वोपस्थितिर्लक्षणायैववाच्या लक्षणया चो
पस्थितिकरणत्वस्य करणीभूतस्य गुणस्य यत्फलभावनायां करणत्वं तदपि ल
क्षणयैववाच्यं श्रूयमाणायास्तृतीयाया गुणमात्रस्य यागं प्रति करणत्वाभिधा
नात् अतएव तंत्ररत्ने चतुर्थैकाकीभूतगोदोहनादेः पशवर्थत्वं समभिव्याहा
रादिसुक्तं अतश्च गुणफलसंबंधविधाने धातोरप्यंतःपारार्थ्यादिवैकदोषबला
दुद्दिश्यहस्य गुणसमर्पकत्वे गुणविशिष्टकर्मविधानमेव स्वीकार्यं तथा सति
यजिनालक्षणभूतं करणत्वमात्रं लभ्यं उद्दिश्यहेन प्रकृताप्येयान मत्वर्थमात्रं लभ्य।
मिति गुणफलसंबंधविधानालाघवं भवति धातोरप्यंतःपारार्थ्यादिकं तन भ
वत्येव धात्वर्थस्यैव फलोद्देशेन विधानात् अतश्चोद्दिश्यहस्य गुणसमर्पकत्वे ३२

तेनमत्वर्थलक्षणयागुणविशिष्टकर्मविधानंस्वीकार्यं उद्भिदायागेनपशुं
भावयेदितिकर्मनामधेयत्वेतूद्भिच्छब्दस्यमत्वर्थलक्षणांविनैवयागस्ययजि
सामानाधिकरण्येनतस्यान्वयसंभवात् उद्भिदायागेनपशुंभावयेदितिसंभव
तिचमत्वर्थलक्षणाश्रयितेनयुक्ता सन्निकृष्टविधानंतुसमानमेव नचैवं
सोमेनयजेतेत्यत्रापिसोमपदस्ययागनामधेयत्वापातोगुणसमर्पकत्वेमत्व
र्थलक्षणापत्तेरितिवाच्यं सोमस्यलतायांरूढत्वेनयागनामधेयत्वानुपपत्तेर्गु
णत्वलक्षणाश्रयणात् उद्भिच्छब्दस्यतुनैवंवाच्योर्थःकश्चित्प्रसिद्धः उद्भिद्यतेऽनेने
नेतियोगस्यतुगुणरूपयागेपिफलोद्भेदनकारित्वेनोपपत्तेः तस्मादुद्भिच्छब्दस्य
मत्वर्थलक्षणाभयाद्यागनामधेयत्वमिति चित्रयायजेतपशुकामइत्यत्रचित्रा
शब्दस्यवाक्यभेदभयात्कर्मनामधेयत्वं तथाहि नतावच्चित्रागुणविशिष्टयागवि
धानंभवति दधिमधुपयोघृतंधानाउदकंतण्डुलास्तत्संसृष्टंप्राजापत्यमित्यनेन
विहितत्वाद्यागस्यविधानानुपपत्तेःप्राप्तस्यचयागस्यफलसंबंधेगुणसंबंधेच

छ ३८

38

विधीयमानेवाक्यभेदः अथचित्राशब्दाच्चित्रत्वस्त्रीत्वयोःप्रतिपत्तेः स्त्रीत्वस्यच
स्वभावतःप्राणिधर्मत्वात्प्रकृतेदध्यादिद्रव्यकेकर्मणिनिवेशायोगात्तेनेनवा।
केनप्रकृतेकर्मणिगुणविधानं किंतुप्राणिद्रव्यकेकर्मणि तत्रास्यवाक्यस्यानार।
भ्याधीतत्वात् अनारभ्याधीतानांचप्रकृतौवाद्विरुक्तत्वादितिन्यायेनप्रकृति।
गामित्वात्प्राणिद्रव्यकाणांचयागानांदैक्षस्यचैतदेषितिन्यायेनाग्नीषोमीयप्र।
कृतिकत्वात्तद्वादेनानेनवाक्येनगुणोविधीयते दैक्षस्यचज्योतिष्टोमांगत्वेन
स्वर्गफलाकांक्षायाअभावात्पशुकामपदेनफलसमर्पकं किंत्वग्नीषोमीयप
श्वर्जनांगतयाप्राप्तकामानुवादः तथाचनवाक्यभेदइतिचेन्न तथापिदैक्षानुवा
देनचित्रत्वस्त्रीत्वविधानेवाक्यभेदात् विशिष्टकारकविधानेपिगौरवलक्षणो।
वाक्यभेदएव कारकस्यापिगामन्येनविशिष्टविधानानुपपत्तेश्च पशुकामपदस्या
पिस्वरसतःफलपरस्यकामनानुवादत्वेआनर्थक्यापत्तेश्च नचनियमतःपश्वर्ज
नकामनाभवति कामनातःप्रागेवकेनचिद्दत्तेपशौतदभावात् तथाचपशुकाम।

परस्यनित्यवत्कृत्वाणाबाधः देवस्योत्पत्तिविशिष्टगुणत्वावरुद्धत्वेन तत्र स्त्रीत्वविधा
नानुपपत्तेश्च अग्निर्देवयागानुवादेन वाजिनविधानवत्कृत्स्नसारंगोत्पत्तीषोमी
यस्पत्तिविशेषविहितेन स्वसन्निधिपठितेन च कृत्स्नसारंगवर्णेनावरुद्धे चित्रात्व।
स्यनारभ्याधीतत्वेन सामान्यशास्त्रेण विधानानुपपत्तेश्च पौर्वदश्यावरुद्धत्व
सामदश्यविधानं अग्नीषोमीयपश्वनुवादेन चित्रात्वस्त्रीत्वविधानं
सारस्वतीमेषीति वाक्यविहितयागांगमेष्यनुवादेन गुणविधानं स्यात् चित्र
येति स्वीकारकानुवादेन चित्रत्वमात्रविधानात् न च प्राकृतेन कृत्स्नसारंगव
र्णेन नैराकांक्ष्यात्र चित्रात्वविधानं युक्तमिति वाच्यम् उपदिष्टेन चित्रत्वेनातिदि
ष्टस्यवर्णेनरस्य बाधोपपत्तेरिति चेन्नैवम् नहि चित्रयेत्येकेन पदेन चित्रकार।
कस्योद्देश्यस्य चित्रत्वस्य च विधानं संभवत्येकप्रसरताभंगलक्षणवाक्यभेदापत्तेः
उद्देश्यविधेयभावस्यानेकपदसाध्यत्वात् अत एव वषट्कर्तुः प्रथमभक्षः इत्य
त्र विशिष्टभक्षविधिर्न तु भक्षानुवादेन प्राथम्यविधिरित्युक्तं तृतीये मेष्यनुवा।

कु मू ५९

39

देनचित्रात्वविधानेफलपदानर्थक्यापत्तेश्चउभयविधानेवाक्यभेदात् प्रकृतस
वयागस्यफलाकांक्षायाअनिवृत्तेः विश्वजिन्न्यायेनफलकल्पनेगौरवंदधिसमि
त्साध्यकत्वनिबाधकत्वेनैतस्याधिकारवाक्यस्यप्रतिपन्नैकवाक्यताबाधेनवाक्यभेदप्रसं
गाच्च चित्राप्राकृतस्यतत्कर्मनामधेयत्वेप्रकृतस्यकर्मणःफलाकांक्षस्यस्वफलसं
बंधमात्रकरणान्नवाक्यभेदः प्रकृतायाइष्टेरनेकद्रव्यकत्वेनचित्राप्राकृतस्यतत्रोप
पत्तेः नसिद्धंवाक्यभेदभयाच्चित्राप्राकृतःकर्मनामधेयत्वमिति अग्निहोत्रंजुहो
तीत्यत्राग्निहोत्रप्राकृतस्यकर्मनामधेयत्वंतत्प्रख्यशास्त्रात् तस्यगुणस्यप्रख्यापक
स्यप्रापकस्यशास्त्रस्यविद्यमानत्वेनाग्निहोत्रप्राकृतःकर्मनामधेयमितियावत् न
ह्याहि विधिनातावत्तदेवविधेयंयस्यकांचनवेणाप्राप्तं अप्राप्तेशास्त्रमर्थवदि
तिन्यायात् अग्निहोत्रप्राकृतस्यचगुणविधित्वेयोगुणस्तेनविधेयःशास्त्रांतरेण
प्राप्तः कथमितिचेत् शृणु यद्येतावदग्निहोत्रमस्मिन्निति समसोसमासमाश्रिया
होमाधारत्वेनाग्निर्विधेयइत्युच्यते तदाहवनीयेजुहोतीत्यनेनैवप्राप्तत्वाद्विध्यान

मू ५९

र्थकं अथाग्नयेहोत्रमस्मिन्निति चतुर्थीसमाससमाश्रित्याग्निरूपादेवतानेनस
मर्प्यत इति चेन्न आख्यातेनैव प्राप्तत्वात् किं तद्धाख्यातरमिति चेत् अत्र केचि
त् यदाग्नये च प्रजापतये च सायं जुहोतीति आख्यातेन होमानुवादेनाग्नि
प्रजापत्योर्विधानादग्निहोत्रपदं देवतासमर्पकं न चोभयविधाने वाक्यभे
दः परस्परनिरपेक्षविधाने हि वाक्यभेदः स्यात् अग्नये जुहोति प्रजापतये जु
होतीति प्रत्येकं व्यापाराद्व्याहृत्यश्रवणाच्च परस्परसापेक्षत्वे पदद्वयस्याका
ङ्क्षान्वयान्न वाक्यभेदः अत एव ऋत्विग्भ्यो दक्षिणां ददातीति वाक्यविहितद
क्षिणानुवादेन गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवा
श्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति वाक्येन गवादीनां विधानं दश।
मोतं संगच्छते परस्परसापेक्षाणां गवादीनां विधानेन वाक्यभेदाभावात् अ।
न्यथा दक्षिणानुवादेनानेकेषां गवादीनां विधानं नैव संगच्छत इति अग्निप्रजा
पत्योश्च देवतयोः सतोः समुच्चयेनानन्तसमुच्चितयोर्देवतात्वं पृथक्कारकविभक्ति

श्रवणात् चकारसमर्थस्य विप्रकर्षे चावगमस्य प्राधान्यात् अतश्च नाग्नी(
षोमीयादिवदग्निप्रजापत्योर्देवतात्वमिति अन्ये त्वाचार्या आहुः अन्यथा च प्र
जापत्यैव सायं जुहोतीति वाक्येनाने: प्रापकं होमानुवादेन प्रजापतिविधाना
त् न च विनिगमनाविरहादुभयविधानं युक्तमिति वाच्यम् विधिना हि न देवता वि(
धीयते यत्प्रकारान्तरेणाप्राप्तम् तत्र यथानेन वाक्येन सायंकालीन विधीयते सा
यं जुहोतीति वचनान्तरेणाप्राप्तत्वात् तथाग्निरपि न विधीयते अग्निर्ज्योतिर्ज्यो
तिरग्निः स्वाहेति मन्त्रवर्णाद्देवदेवतायाः प्राप्तत्वात् मन्त्रवर्णस्यापि देवतासमर्प(
कत्वमस्त्येव अत एव पौष्णयागे विश्वादीनां मान्त्रवर्णिकं देवतात्वमित्युक्तं न चैवं
प्रजापतिदेवतया निर्बाधः स्यात् चतुर्थ्या हि प्रजापतेर्देवतात्वमवगम्यते अग्नेस्तु
मान्त्रवर्णिकं तत्र सामान्ये देवतेति देवतात्वेन झटित्यवगमात् यद्यपि देवतात्वे चतु(
र्थीस्मरणं नास्ति संप्रदाने चतुर्थीति संप्रदाने तस्याः स्मरणात् तथापि यज्यमान(
द्रव्योद्देश्यत्वं तावद्देवतात्वं तच्च संप्रदानरूपान्तर्गतं यज्यमानद्रव्योद्देश्यत्वे सति

प्रतिगृहीत्यावस्य संप्रदानत्वात् अतश्च तदधीनः संप्रदानैकदेशतया देवतात्वप्रतीति
रस्त्येव मंत्रवर्णाद्विने देवतात्वं प्रतीयते किं त्वविधिपृष्टानमात्रं अतश्च मंत्रवर्णाश्च तदर्थी-
तो दुर्बलः यथाङ्गः तद्धिते न चातुर्थ्यो वा मंत्रवर्णेन वा उक्तः देवताया विधिस्तत्र दुर्ब-
लत्वपरं परमिति अतश्च प्रबलप्रमाणबोधितप्रजापतिदेवतया दुर्बलप्रमाणबोधि-
ताग्नेर्बाधः स्यादिति चेत् सत्यं स्याद्यद्यग्नये प्रजापतये जुहोतीति केवलं प्रजापति-
विधानं स्यात् विधीयमानस्तु प्रजापतिर्मंत्रवर्णप्राप्तमग्निमनूद्य तत्सम्बन्धितो हो-
मोद्देशेन विधीयते सम्बन्धितोभयविधानापेक्षया न्मतः प्राप्तमग्निमनूद्य तत्सम्बन्धि-
तप्रजापतिमात्रविधाने लाघवात् अतश्च न बाधकत्वं समुच्चयविधानात् यथा च निरपेक्षाविधाना-
तन्मते अग्निप्रजापत्योरेकहोमोद्देशेन विधानात्तुल्यार्थत्वेन विकल्पे प्रसक्ते प्रजापते- भावात्
र्नैपाक्षिकमग्निबाधकत्वं समुच्चयविधानात् एवं मंत्रवर्णप्राप्तमग्निमनूद्य तत्सम्ब-
न्धितप्रजापतिविधानेपि न बाधकत्वमिति तत्त्वम् एतेन मंत्रवर्णिकत्वेऽग्निर्ज्योति
र्ज्योतिः सूर्यः स्वाहेति मिश्रलिंगमंत्रवर्णबलात्सायहोमस्य द्विदेवत्यत्वापत्तिरिति तन्न

कु ५१

अग्निसमन्वितप्रजापतिविधानवत्सूर्यसमन्वितस्यापि विधानात्प्रबलप्रमाणाबाधितेन
प्रजापतिना मंत्रवर्णप्राप्तस्य सूर्यस्य बाधितत्वात् यत्त्वग्नेर्मांत्रवर्णिकत्वे प्रजापतिविधे
रेकेनैव वाक्येन सिद्धेर्यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रा
तर्जुहोतीति वाक्यद्वयं व्यर्थमिति तन्न भवेद्व्यर्थं यदि प्रजापतिमात्रविधानं विवक्षितं
स्यात् सायंहोमेऽग्निसमन्वितप्रजापतिविधानं प्रातर्होमे सूर्यो ज्योतिः ज्योतिः सूर्यः स्वा
हेति मंत्रवर्णप्राप्तसूर्यसमन्वितप्रजापतिविधानं च विवक्षितं न चैतदेकेन वाक्येन सि
ध्यतीत्यतोऽर्थवद्वाक्यद्वयं यत्त्वग्नेर्मांत्रवर्णिकत्वे मंत्रवर्णस्याग्निर्ज्योतिर्ज्योतिरग्निः स्वा
हेति सायं जुहोतीति वाक्येन सायंहोमे विनियुक्तत्वात् तत्प्रकाश्यस्याग्नेरपि प्रजापतिस
मन्वितस्यैतत्रैव देवतात्वे वाग्नेर्यदग्नये चेति वाक्ये सायं होमे व्यर्थमिति एवं यत्सूर्याय चेति
वाक्ये प्रातः होमे व्यर्थमिति किं च मंत्रवर्णे ज्योतिः शब्द एव विशिष्टस्याग्नेः प्रकाशनाद्वि
शिष्टस्यैव देवतात्वापात इति तदपि न होमानुवादेन देवताद्वयविधानेऽपि [illegible]
[illegible] सर्वत्र मंत्रवर्णेषु लिंगाद्देवताप्राप्तिसंभवात् सहित्याप्यनर्थक्यात् मिथो लिंगा मंत्रे वै

५१

विपर्युदस्तयोः प्रतिसवार्थं विधानेपि तन्नियोगात्तयोः सामर्थ्यप्राप्तः प्राहूयोर्विशिष्टाद्देवताप्रा
प्तिसंभवात्तानर्थक्यं विधीयमानयोर्मंत्रयोर्व्यवस्थयैव प्राप्तिसंभवात् न्यकारपपयोर्देव
तयोर्व्यवस्थितत्वात् अग्नावादेत्वोक्तित्तभयत्रात्र लेति मांत्रवर्णिकत्वेपि अग्नेः केवलस्ये
वदेवतात्वं न तु गुणविशिष्टस्य यद्यनये चेति वाक्योग्नेः सर्वाङ्गनिर्देशेपत्र च केवलस्येवाग्नेः
संकीर्तनात्केवलस्यैव देवतात्वावगतेः यथोपांशुयाजे विष्ण्वादेर्मांत्रवर्णिकत्वेपि न
गुणविशिष्टस्य देवतात्वं विष्णुरुपांशुयष्टव्य इत्यर्थवादे केवलस्यैव संकीर्तनात् तद्वदिहापि
अतश्च मांत्रवर्णिकत्वे दोषाभावाद्देवताद्वयविधाने च गौरवापत्तेरन्यतः प्राप्तमग्निम
नूद्य तत्समुच्चितः प्रजापतिरेवात्र विधीयते इमामगृभ्णन्नित्यत्रेवोभयविधाने वाक्यभेदः प्रसं
गाच्च न च चकारश्रवणान्न वाक्यभेद इति वाच्यं चकारार्थो हि समुच्चयः तं च समुच्चयं प्र
ति चकारः प्राधान्येन द्रव्ययागदेवताप्रधानस्थानीयविशेषणसंग्राहकत्वात् अग्न्यापादिविशि
ष्टद्वयविधाने चकारकृतद्वयसमुच्चयविधाने वाक्यभेदो न भवेत् न चकारः प्राधान्येन स
मुच्चयं ब्रूते परोपसर्जनत्वेन विधानात् अत एव विधानादृष्टमेभाष्यकारैश्चकारस्य।

५२ समुच्चयग्राह्याद्देवदत्तादिप्रतिपादितं समुच्चयग्राह्योदितं प्राधान्येनद्योतेनचकारः यदिहि
प्राधान्येनद्योतयात्तदाप्रतिपन्नः समुच्चयः क्रियागुणो संबध्यते समुच्चयः शोभनः समु
च्चयोदृष्टव्यइतिवच्च शोभनस्यद्रव्यस्यैतिप्रयोगः स्यात् समुच्चयग्राह्यवच्चकारस्यप्राधान्ये
52 नसमुच्चयवाचित्वेधववखदिरयोः समुच्चयइतिवद्धवखदिरयोश्चेत्यपिप्रयोगः स्यादिति
अतश्चकारः समुच्चयं नप्राधान्येनद्योतयेनप्रधानस्यैकस्यविधानान्नवाक्यभेदोभवेत् किं
तुकारकद्वयोपसर्जनत्वेनैवसमस्तं द्योतेसमुच्चितौऽग्नि प्रजापतीइतिप्रधानद्वयविधाने
चवाक्यभेदः स्यादेव यथाग्नेयोद्देशेनसंमार्गैकत्वविधानेयद्यपिचकारः समुच्चयं प्राधान्ये
नद्योतयात्तथापितस्यकारकद्वयं प्रतिप्राधान्यमनुपपन्नं विभक्त्यभिहितस्यकारकद्वयस्या
क्रियोपसर्जनत्वेनसमुच्चयोपसर्जनत्वाभावात्ततःदंतादिशब्दैः समुपस्थितं कारकं क्रियातो
न्येनसंबध्यतेकारकसमुच्चयः कारणासमुच्चयइति विभक्त्यभिहितं तु क्रिययैवकारकाणा
तस्यैवान्वयात् अतश्चकारेणोच्यमानः सः कारकोपसर्जनत्वेनैवोच्यते कारकद्वयं चप्र
धानमेकोद्देशेनचप्रधानद्वयविधानेवाक्यभेदएव यथाङ्गं अनेकपदसंबद्धं ययेक
५२

मपिकारकं तथापि तद्दनादृतेः सत्ययैव विधीयत इति यच्चयथाद्दक्षिणानुवादेन गवा
दयो विधीयन्ते उक्तरीत्या वाक्यभेदापत्तेः चकारश्रवणेन कथंचित्परिहारेपि गवादीना
मनेकेषां द्रव्याणां तत्संख्यायाश्च विधाने वाक्यभेद एव आध्वर्यवप्राख्यायां गोश्चेत्यत्र
त्यादेस्तस्याद्रव्याणामित्यं तस्य संस्कृतत्वेन चासिकवाक्यान्वमित्युक्तं दशमे अतो ने
वै न वाक्येनोभयविशिष्टा दक्षिणा विधीयते विशिष्टविधानाच्च वाक्यभेदः अत एव पा
र्थसारथिमिश्रैर्दशमे तत्र तत्रोभयविशिष्टा विधीयते अनेकगवाद्यात्मिकैकादक्ष
िणा विधीयत इति चोक्तं न चैवमृत्विग्भ्यो दक्षिणां ददातीत्यस्यानर्थकं तस्यानुवाद
त्वादृत्विक्संबंधपरत्वाद्वा दक्षिणाग्रहसामर्थ्याद्धि ऋत्विजां चमसाध्वर्यादीनां च तत्सं
बंधः स्यात् एतद्वाक्यसत्वे च न भवति ऋत्विक्शब्दस्य ब्रह्मादिगतऋत्वियजननिमित्तत्वेन
चमसाध्वर्यूणां ऋत्विक्त्वाभावस्य तृतीये उक्तत्वात् अतश्च गोश्वाद्यश्वेत्यस्मिन्वाक्येपि वि
शिष्टविधानान्न वाक्यभेदः यदग्नये च प्रजापतये च सायं जुहोतीति तु विशिष्टविधाने
होमस्याग्निहोत्रं जुहोतीत्यनेन प्राप्तत्वात् अतश्च होमानुवादेन समुच्चितोभयविधाने

पु ५३ वाक्यभेदाज्ञैवापत्तेश्च नानेन वाक्येन देवताद्रव्यं विधीयते किंतु मंत्रवर्णप्राप्तमग्निमनू
द्यतत्समुच्चितः प्रजापतिर्द्वितीयो हि देवो न विधीयते अतस्तेनेदमुक्तिः ज्ञापकं किंतु मंत्रवर्णा एव अ
तस्तेनाग्नेः प्राप्तत्वान्नाग्निहोत्रपदं देवतासमर्पकं किं तर्हि नामधेयमेव तमित्थमेतत्त्व
मप्यप्राप्तत्वादग्निहोत्रशब्दस्य कर्मनामधेयत्वमिति एवं प्रयाजेष्वपि समिदादिदेवतानां स
43 मिधोग्नआज्यस्य व्यन्त्वित्यादिमंत्रवर्णेभ्यः प्राप्तत्वात्समिधो यजतीत्यादिष्वपि समिधादिशब्दा
नामप्यप्राप्तत्वात्कर्मनामधेयता यथाह विधित्सितगुणाप्राप्तिप्राप्तस्यानुपयतस्त्विह न
स्यात्तत्समर्पणं ह्यर्थमिति नामत्वमिष्यते इति दिक् श्येनेनाभिचरन्यजेतेत्यत्र श्येनशब्दस्य
कर्मनामधेयत्वं तद्व्यपदेशाधिकरणन्यायात्तेन व्यपदेशादुपमानं तदन्यथानुपपत्त्येति यावत् तथा
हि तद्विधेयं यस्य स्तुतिर्भवति न च यथा श्येनो विधेयः स्यात् तदार्थवादे तस्यैव स्तुतिः कार्या
न च यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते इत्यनेनात्र श्येनार्थवादेन
स्तोतुं शक्यः श्येनेनोपमानेनार्थान्तरस्तुतेः क्रियमाणत्वात् न च श्येनेनोपमानेन श्येनस्यैव स्तो
तुं शक्यते उपमानोपमेयभावस्य भिन्ननिष्ठत्वात् यदा तु श्येन संज्ञकयागो विधीयते तदार्थ

वादेन रूपेणोपमानेन तस्य स्तुतिः कांडोपाकरणे तु तिरूपेण प्राकृतस्य तद्व्यपदेशाद्यागनामध
धेयत्वं तत्सिद्धेर्निमित्तचतुष्टयान्नामधेयत्वं उत्पत्तिशिष्टगुणावलीयस्त्वमपि पंचमं
नामधेयत्वे निमित्तं केचिदाहुः वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्दस्य कर्मनामधेयत्व
मुत्पत्तिशिष्टगुणावलीयस्त्वात् मत्वर्थलक्षणादिप्रकारचतुष्टयासंभवात् तथाहि
न तावन्मत्वर्थलक्षणाभयान्नामधेयत्वं युक्तं वक्तुं वैश्वदेवेनेति तद्धितेनैव मत्वर्थस्य यागसं
क्त्वात्सास्यदेवतेत्यस्मिन्नर्थे हि तद्धितस्मरणं तत्रास्य शब्दस्य तद्धितांतर्गतस्य यद्य
पि सूक्तहविषोरिति स्मृतेः सूक्तहविषोरिवानुख्यत्वमवगतं तथापि सर्वनाम्नामुपस्थि
तवाचित्वात् सूक्तहविर्विशेषस्यात्रानुपस्थितत्वाद्यजेतेत्युपस्थितं यागमेवास्य शब्दोऽभिध
त्त इति न यागे मत्वर्थलक्षणा विश्वदेवरूपैकदेवताविधानाच्च न वाक्यभेदः नापि त
त्प्रख्यशास्त्रान्नामधेयत्वं यत्र हि विधित्सितो गुणोऽन्यतः प्राप्तस्तत्र तत्प्रख्यशास्त्रान्ना
मधेयत्वं यथाग्निहोत्रशब्दे अत्र चाग्नेयादयोऽष्टौ यागाः प्रकृतास्तत्रामिक्षायागे
यद्यपि विश्वेदेवाः प्राप्ताः वैश्वदेव्यामिक्षेति तथापि समस्तानेषामप्राप्तत्वाद्वैश्वदेवेन

यजेतेत्यनेन तत्र तद्विधाने न तत्र स्वशास्त्रमन्यत् येन तद्धर्मान्नामधेयत्वं स्यात् नचार्थिक्षायागतस्यैव तन्नामेति वाक्यं वै
श्वदेवेन १

ॐ ४४

यजेतेति चावपवैयर्थ्यापत्तेः वैश्वदेवशब्दस्याग्निहोत्रायागमात्रनामत्वं सपक्वयागो
नेनानूद्यतेइति वाच्यं नचतदनुवादेनास्ति किंचिद्रूपं प्राचीनप्रवणे वैश्वदेवेन ।
यजेतेति विधीयमानस्य प्राचीनप्रवणादेशस्य विनाप्येतद्वाक्यमाग्निहोत्रायागएवसं
बंधोपपत्तेः विश्वेदेवसंबंधात्तस्याग्नेयाद्यपेक्षप्रकृष्टयागनामधेयत्वे तु न वैश्वदेवे
नयजेतेति वाक्यानर्थक्यं तदाद्यनेनाष्टयागानामनूद्यंते अनुवादेनचैकप्रतीत्यारू
ढत्वात्समुदितानामष्टानामपि वैश्वदेवशब्दो नामधेयं सिध्यति एवं च प्राचीनप्रव
णे वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्देनाष्टयागाननूद्य प्राचीनप्रवणविधानं त
त्र सिद्धं भवति तद्वाक्यस्यासत्वेऽनेन वाक्येनाग्निहोत्रायाग एव प्राचीनप्रवणदेशसं
बंधः स्यात् अतश्चाष्टसु यागेषु प्राचीनप्रवणदेशसंबंध एव तद्वाक्यप्रयोजनम्
एवं च वैश्वदेवशब्दोष्टानां नामधेयं न च तत्र व्यपदेशस्य निमित्तं संभवति समस्तु विश्वे
देवाप्राप्तेः अतो न वैश्वदेवशब्दस्य तद्व्यपदेशान्नामधेयत्वमिति नापि तद्व्यपदेशा
नादृष्टपस्य व्यपदेशस्योपलंभात् अतश्च वैश्वदेवशब्दस्य नामधेयत्वे उक्तप्रकार ४४

चतुष्टयस्यानिमित्तत्वादुत्पत्तिशिष्टगुणाबलीयस्त्वमेवनिमित्तं तथाहि वैश्वदेवे
नयजेतेत्यत्रनतावदप्रकृतकर्मानुवादेनदेवताविधानंसंभवतितेषामत्राप्युपस्थि
तेः नापिदेवताविशिष्टकर्मांतरविधानंसंभवतिगौरवप्रसंगः अष्टौहवींषीत्यन
न्यगतिकलिंगविरोधात् अतोनेनवाक्येनप्रकृतकर्मानुवादेनदेवताविधीयतइति
वक्तव्यं तत्रामीक्षायागेविश्वदेवप्रसंगः समस्तयागेष्वनेनवाक्येनविश्वेदेवाविधी
यंतइतिवक्तव्यं नचतत्संभवतितेषामुत्पत्तिशिष्टान्याग्यविरोधात् आकांक्षाया
वंधो ह्यसंभवति अग्नेयादियागानांहिदेवताकांक्षोत्पत्तिशिष्टैरग्न्यादिभिरेवनिवृत्ता
रितिनतत्रविश्वेदेवविधानंयुक्तं अतश्चोत्पत्तिशिष्टगुणाबलीयस्त्वाद्वैश्वदेव
शब्दस्यकर्मनामधेयत्वमिति यथाहुः गुणांतरावरुद्धत्वान्नावकाशोपरगुणोपरः वि
कल्पोपिनवैषम्यात्तस्मान्नामैवयुज्यतइति अन्यैवाचार्यैराहुः यःशब्दोयत्रक
र्मणियद्गुणसंबंधंबोधयतिसचेत्संबंधःशास्त्रांतरप्रतिपन्नस्तदातस्यशब्दस्यतन्ना
मधेयत्वंतत्प्रख्यशास्त्रात् तच्चशास्त्रांतरंविधिर्वार्थवादोवेत्यत्रानादरः तत्राग्नि

मु
५५

होत्रग्राहेति निसंबंधवेभवं प्राप्तांतरं विधिरेव वैश्वदेवग्राहस्य विश्वेदेवसंबंधक
मणि वायव्यमिति विश्वेदेवसंबंधस्याग्रहस्तु यागेषु यद्विश्वेदेवाः समयजंतनद्वैश्वदेवस्य
वैश्वदेवत्वमित्यर्थवादादवगतं नच विधिरेव तस्य व्यपदेशसंस्तुतार्थवाददृष्टपत्र किंचि
न्प्रमाणमस्ति अत एव ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र ज्योतिष्टोमशब्दस्तानि
वा एतानि ज्योतींषि य एतस्य स्तोमा इत्यर्थवादादवगतं ज्योतिः संबंधनिमित्तीकृत्य
सोमयागे प्रवर्तमानस्तस्य व्यपदेशात् नामधेयं भवति एवं कृतेपि तद्ग्रहणं पंचमप्र
कारकल्पने प्रमाणाभावात् अत एव वैश्वदेवाधिकरणे वार्तिककारैरेवमुपसंहृतं
तस्माद्व्यपदेशेन सर्वेषां नामधेयत्वमिति यच्चोत्पत्तिशिष्टगुणबलीयस्त्वमुक्तं तद्गुण
विधिसंभवे युक्तमत्र द्रव्यमात्रं तस्मिंस्तत्र व्यपदेशात् वैश्वदेवग्राहस्य कर्मनामधेय
त्वमिति न तु एतत्सोमाधिकरणेपि वायव्यं गृह्णातीत्यादिना यजिकल्पनं सोमेन
यजेतेति प्रत्यक्षयति शक्नोतीत्युक्तं तेन न्यायेन वैश्वदेवामिक्षेत्यत्रापि यजिकल्प
नामात्र वैश्वदेवेन यजेतेत्यत्र प्रत्यक्षयजि श्रुतेः एवं चानेन वाक्येन देवताविधा ५५

ष्टकर्मविधानमस्तु तस्यचद्रव्याकांक्षायांवैश्वदेव्यामीक्षेतिद्रव्यविधानम
स्तु एवंचनवाक्यद्वयस्याप्यनुवादकत्वं नाप्यवैश्वहविषीत्यनन्यगतिकलिंग
विरोधो भवेदितिचेन्मैवं वैश्वदेव्यामीक्षेत्यत्रयजिकल्पनेआमीक्षाकिमनु
वादेनविधीयतइतिवक्तव्यं विश्वदेवानुवादेनविधानेद्रव्यस्यदेवतांगत्वमेव
स्यान्नयागांगत्वं किंचवैश्वदेवीपक्षेदेवतातद्धितत्वादामीक्षांतत्वेनश्रुतंद्र
व्यं तत्रविश्वेदेवानुवादेनद्रव्यविधानेवैश्वदेवीपक्षेनैवकर्तव्यंपरश्रूयते:
यथाभावनायांकरणसमर्पणायात्तनैवक्रियतेपरश्रूयतेनत्रूपपदेनेत्युक्तम्
भावार्थाधिकरणेनह्यतु तत्रचवचनद्वयकर्तृःप्रथमभदइतिवदेकप्रसरतावि
रोधः अतोयागानुवादेनापिद्रव्यविधानार्थंवैश्वदेव्यामीक्षेत्यत्रयजिक
ल्पनंतावदवश्यंकर्तव्यं ततश्चयप्रत्ययसामानाधिकरण्यायवैषम्यपेन्द्रवाय
वंगृह्णातीत्यत्रदेवताविशिष्टग्रहणविधानेनयज्युपकल्पनात् यजिकल्पने
वैश्वदेव्यामितित्यत्रैवद्रव्यदेवताविशिष्टकर्मविधानंस्फुटरूपद्वयश्रवणात्
एवंचारनेयोष्टाकपालःसौम्यश्चरुरित्यादिवाक्येवैश्वदेव्यामीक्षेत्यस्यप्रायःपा

कु
५६

ऽरहितो भवति अन्यथाहि तेषु सर्वेषु द्रव्यदेवतासंबंधकल्पितयागविधानमत्र
चद्रव्यमात्रविधानमिति वैरूप्यं प्रसज्येत किंच वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्द
स्य देवतासमर्पकत्वे यद्विश्वेदेवाः समयजन् तद्वैश्वदेवस्य वैश्वदेवत्वमित्येतस्याऽ
र्थवादस्यानुपपत्तिमेव निरालंबनत्वस्यात् एतदर्थवादाद्धि वैश्वदेवशब्दो विश्वेदेवक
र्तृकत्वेन कर्मणि प्रवृत्त इति ज्ञायेत ननु देवतासमर्पकत्वे विरुध्यते किंच वैश्वदेवेन
यजेतेत्यस्य यागविधित्वे आमिक्षापानेऽप्यनिशिष्टत्वं तथा च न तया वाजिनं वा विधि
शक्यते द्रव्यभूयोरण्यामिक्षा वाजिनयोर्योगत्वं स्यात् तथा च विकल्पः स चाष्टदोष
दुष्ट इति तस्माद्वैश्वदेव्यामिक्षेत्यत्रैव यागविधानं इतरत्र सत्वनुवादत्वं अनुवादत्वे
च यथा चानानर्थक्यं तथोक्तमित्यास्तां तावत् तस्मिद्धं वैश्वदेवस्य कर्मनामधेय।
त्वं तद्देवं निरूपितं मत्वर्थलक्षणादिप्रकारवत् तद्यनिरूपणेन नामधेयस्य विधेया
र्थपरिच्छेदकतयार्थवत्त्वं श्रीकृष्णो जयति अनर्थहेतुकर्मणः सकाशान्निरुपप
स्य निहन्तिकत्वेन न निषेधानां पुरुषार्थानुबंधित्वं तथा हि यथा विधयः प्रेरणा।
मभिदधतः स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयःसाधनत्वमाक्षिपन्तः

शास्त्रेणाहवनीयशास्त्रस्येव नानुयाजेष्विति विशेषशास्त्रेण यजतिषु येयजामहं क-
रोतीति सामान्यशास्त्रस्य बाधः स्यादिति वाच्यं शास्त्रयोर्हि तत्र बाध्यबाधकभावो
यत्र परस्परं निरपेक्षता न त्विह पदशास्त्रस्य स्वार्थविधानार्थमाहवनीयशास्त्रापेक्षाऽ-
स्ति निषेधशास्त्रस्य तु प्रसक्त्यर्थं यजतिषु येयजामहं करोतीति विधेरपेक्षा ए-
वं च निषेधशास्त्रस्य विशेषविषयत्वेन प्राबल्यवद्विधिशास्त्रस्याप्युपजीव्यत्वेन प्रा-
बल्यमस्तीति न निषेधेन विधेरयं न बाधो युज्यत इति विहितप्रतिषिद्धत्वाद्धि कल्पः स्या-
त्स च न युक्तः विकल्पे हि पक्षे शास्त्रस्याप्रामाण्यं भवति व्रीह्यनुष्ठानसमये यव-
शास्त्रस्यादृष्टकल्पना च स्यात् विधेर्हि फलं ज्ञायते यदनुयाजेषु येयजामहं कर- ये
णे कश्चनोपकारो भवतीति निषेधाच्च तत्करणादिति ज्ञायते अन्यथावदनाकरणादि-
वद्दर्शपूर्णमासयोः स चापकारो दृष्टरूपश्च न हि दृष्टकल्पनाप्रसंगः अतश्च विकल्पा-
नयुक्तः प्रतिषेधाश्रयणे तु तदापत्तेर्न तदाश्रयणं किं तु नञः अनुयाजशब्देन संबंध-
माश्रित्य पर्युदास आश्रीयते तेन अनुयाजशब्दाभ्यां अनुयाजव्यतिरिक्तलक्षणात् अ-
नेष्वनुयाजेषु येयजामहं करोति ना-
नुयाजेष्वित्यस्य प्रामाण्यं भवति ६

नुयाजव्यतिरिक्तेषु ये यजामहं करोतीति अत्र च वाक्ये यजामहंकर्तव्यतया न विधी-
यते यजतिषु ये यजामहं करोतीत्यनेनैव विहितत्वात् किंतु सामान्यशास्त्रविहितये य-
जामहस्यानुवादेन तस्यानुयाजव्यतिरिक्तविषयतया विधीयते यजतिषु ये यजामहं
करोतीति तस्त्वनुयाजव्यतिरिक्तेष्विति एवं च सामान्यशास्त्रस्य विशेषापेक्षित्वात् नानुयाजे-
ष्वित्यनेनानुयाजव्यतिरिक्तविषयसमर्पणात्त्वनुयाजव्यतिरिक्तेषु ये यजामहं कर्तव्यत-
याप्राप्तः अनुयाजेषु तस्य न कर्तव्यतया प्राप्तो न वा प्रतिषिद्ध इति न विकल्पः लक्षणया
चानुयाजव्यतिरिक्तविषयसमर्पणान्नानुयाजेष्विति वाक्यस्य पर्युदासाश्रयणे यजति-
षु ये यजामहं करोतीति शास्त्रीयाणां सामान्ये प्राप्तस्य ये यजामहस्य नानुयाजेष्वित्यने-
नानुयाजव्यतिरिक्ते संकोचनरूपपर्युदासस्योपसंहारादभेदः स्यात् उपसंहारो हि प्राप्तस्य विशे- सामान्ये ४
षे संकोचो भवति यथा पुरोडाशं चतुर्धा करोतीति पुरोडाशसामान्ये प्राप्तं चतुर्धाकरणं आग्ने-
यं चतुर्धा करोतीति आग्नेये संकोचार्थत्वादुपसंहारस्य न स्वरूपमात्रसंकोचार्थत्वात्पर्युदासस्ये-
ति विवेचितं अन्ये तूपसंहारो नाम सामान्यतः प्राप्तस्य विशेषसंकोचनरूपो व्यापारविशेषो वि-
नाशमात्रं अतश्च पर्युदासाश्रयणेन किंचिद्बाधकं न सिद्धं नानुयाजेष्विति वाक्यविकल्पभयात्पर्युदासाश्रयणमिति ननु ६ ५२

[illegible]

धेः पर्युदासस्तु पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् इत्यभियुक्तैरभ्यधायि किं
नयाजेनावानाम्नावानञः संबंधः अतोऽनयोस्तावत्स्वरूपतः स्पष्ट एव भेदः एवं
सत्यपि भेदसाधर्म्ये केचन वदन्ति यत्र पर्युदासस्तत्रावश्यमुपसंहारः स्यात् नचैतद्युक्तिमे
हेतोः श्यंतमित्यादौ सत्यपि तस्मिन्नुपसंहाराभावात् नहि तत्राग्नेयेच तन्दुलीकरणमि
वघातमात्रेण प्राप्तं किंचिद्विशेषे संकोच्यते पापदत्तयोर्दीक्षोनानीतस्य संकल्पमात्रवि
धानात् प्रकृतोदाहरणे तु यजिसामान्येन प्राप्तस्य येयजामहस्यानुयाजव्यतिरिक्ते
षु संकोचनाय परिविधेरुपसंहारविधित्वं भवति नैतावता किंचिद्रुध्यते विध्यऽ
भावे हि कथं विधिकार्यमुपसंहारः पर्युदासेन क्रियत इति भवति विरोधः नचा
त्र विधिर्नास्ति नञोऽनुयाजपदसंबंधेन विधेर्विधायकत्वस्याव्याघातात् अत्र हि
पर्युदासोऽनुयाजव्यतिरिक्तविषयसमर्पकः आग्नेयपदवत् उपसंहारकस्तु विधिरे
व न चात्र तन्मात्रसंकोचाभावान्नोपसंहार इति वाच्यम् तन्मात्रसंकोच इति कोऽर्थः
आग्नेयमात्रे संकोचो वा सामान्यप्राप्तस्य विशेषमात्रे संकोचो वा आद्ये नारम्भार्थी

५२

52

तस्य सामर्थ्यस्य मित्रविंदादिप्रकरणस्थेन वाक्येनोपसंहारो न स्यात् आग्नेये
संकोचाभावात् द्वितीये च वैकरणस्थ ओदनमात्रे ग्रामस्य आग्नेये संको(
चवदनुयाजान्त्ययाजसाधारण्येन ग्रामस्यानुयाजेषु संकोचाडुपसंहारः स्या
देतत् एतावांस्तु विशेषः आग्नेयादिवाक्येषु आग्नेयादयो विशेषाः स्वप(
देपस्थापिताः यकृते तु पर्युदासेन तस्योपस्थितिरिति उपसंहारन्यायस्य
विशिष्ट एव यद्वत्तद्रूपमात्रसंकोचनार्थत्वात् पर्युदासस्येति तन्न भेदेऽप्यत्र
सत्यपि पर्युदासे संकोचाभावात् न ह्यत्र सामान्येन प्राप्तं तद्रूपमात्रे संकोच्यते
संकल्पमात्रविधानादिरूपेणाभ्यनुमतं नावधा न तस्मिन्ननुयाजेष्वित्यत्र विकल्प
प्रसक्त्या पर्युदासाश्रयणमिति यत्र तु स्वरूपाश्रयित्वं न घटते तत्र न प्रसक्तावपि नि
षेध एवाश्रीयते यथा नातिरात्रे षोडशिनं गृह्णातीत्यत्र अतिरात्रे षोडशिनं गृह्णाती
ति शास्त्रप्राप्तमतिरात्रे षोडशिग्रहणं प्रतिषिध्यत इति विहितप्रतिषिद्धत्वाद्विक
ल्पप्रसक्तावपि पर्युदासो नाश्रीयते अनुयाजवाक्यवदिहात्र नञः षोडशिपदेन संबं ५२

धः स्वीक्रियते तदाऽतिरात्रे षोडशिग्राह्यमिति किं गृह्णातीति वाक्यार्थः स्यात् तत्र चा॰
तिरात्रे षोडशिनं गृह्णातीति अन्यपदविधिविरोधः अत एवातिरात्रपदेन नञः सं
बंधः अतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविरोधात् अतश्चात्र पर्युदासस्या॰
नुपपत्तेर्निषेध एव स्वीक्रियते विकल्पोऽपि स्वीक्रियतेऽनन्यगतेः अतश्चैतत्सि॰
द्धं यत्र नञ्स्वतन्त्रमित्याद्युपक्रमो विकल्पप्रसक्तिश्च नास्ति तत्र प्रतिषेधो यथा न क
लिंजं भक्षयेदिति यत्र वा विकल्पप्रसक्तावपि पर्युदास आश्रयितुं शक्यते तत्र प्र
तिषेधो यथा नातिरात्रे षोडशिनं गृह्णातीति एतावांस्तु विशेषः यत्र विकल्पा
पादकः प्रतिषेधस्तत्र निषेध्यमानस्यानर्थहेतुत्वं उभयोरपि विधिनिषेधयोः
क्रत्वर्थत्वात् यत्र तु न विकल्पः प्रसज्यतेति प्राप्तिश्च रागतः प्रतिषेधश्च पुरुषार्थ
स्तत्र निषिध्यमानस्यानर्थहेतुत्वं यथा कलिंजभक्षणस्य दीक्षितो न ददाति न जु
होतीत्यादिषु दानहोमादीनां प्राप्तत्वप्राप्तावपि पुरुषार्थत्वेन प्राप्तत्वात् क्रत्वर्थत्वे
न च प्रतिषेधात् क्रत्वर्थत्वाभावेन विकल्पाप्रसक्तावपि न तेषामनर्थहेतुत्वं ॥२॥

कु॰
५२
53

तः प्राप्त्यभावात् रागतः प्राप्तस्यापि क्रत्वर्थत्वेन प्रतिषेधेन दत्तशुनात्क्रतोर्वैगुण्यं
नानर्थोत्पत्तिः यथा स्वस्त्रुपगमनादिप्रतिषेधे रागतः प्राप्तस्य पुरुषार्थत्वेन प्र
तिनिषेधे निषिद्धस्यानर्थहेतुत्वमिति दिक् तत्सिद्धं निषेधानां पुरुषार्थानुबंधित्वं
एवं सर्वस्यापि वेदस्य पुरुषार्थानुबंधित्वं प्रकृतं हरिः ॐ प्रकृतमनुसरामः तदेवं य
ष्याविध्यादीनामध्ययनविध्युपात्तानां नानर्थक्यं एवमर्थवादानामपि तदुपात्त
त्वेनानर्थक्यानुपपत्तेः स्वार्थप्रतिपादने च प्रयोजनाभावात् लक्षणया प्रयोजनव
वदर्थपर्यवसानं कल्प्यं ते चार्थवादा द्विविधा विधिशेषा निषेधशेषाश्च तत्र
वायव्यं श्वेतमालभेतेत्यादिविधिशेषाणां वायुर्वै क्षेपिष्ठा देवतेत्यादीनामर्थवादा
नां विधेयार्थस्तावकतया सार्थक्यं बर्हिषि रजतं न देयमित्यादिनिषेधशेषाणां सोऽरोदी
त्यादीनामर्थवादानां तु निषेध्यनिंदकतयेति अतश्च लक्षणया प्राशस्त्यमर्थवादैर्बो
ध्यते तच्च प्राशस्त्यज्ञानं शाब्दभावनायामितिकर्तव्यतात्वेन संबध्यत एवमप्रकृतं त
त्सिद्धं वक्ष्यमाणार्थभावनाभाविका लिङादिज्ञानकरणिका प्राशस्त्यज्ञानेतिकर्त

ते॰
५२

ख्याता का शाब्दी भावना लिङ्त्वांशेनोच्यते ननु केयं शाब्दी भावनोच्यते पुरुषप्र
वृत्त्यनुकूलो व्यापारविशेषः स एव विध्यर्थः लिङादिश्रवणेऽयं मां प्रवर्तयतीति
तस्य नियतेन प्रवृत्तेः यत्त्विष्टसाधनं विध्यर्थः तत्र तथा सतीष्टसाधनमिति शब्दस्य
विधिशब्दस्य पर्यायः स्यात् न च पर्यायत्वं युज्यते संध्योपासनं नेष्टसाधनं तस्मात्
त्वं कुर्विति सह प्रयोगात् पर्यायाणां सह प्रयोगाभावात् अतश्च व्यापारविशेष एव वि
ध्यर्थः स च लोके पुरुषनिष्ठोऽभिप्रायविशेषः वेदे तु पुरुषाभावाच्छब्दनिष्ठ एव प्रेरणा
परपर्याय इत्युक्तं ननु लोके शब्दनिष्ठप्रेरणापरपर्याये व्यापारे शब्दप्रयोगाभावे
न प्राक् क्रियाग्रहाभावात् कथं तस्य विधिशब्दस्य प्रतिपत्तिरिति चेत् सत्यमेतत् तथापि बा
लस्तावत् स्तनपानादौ स्वकृतरोदनादिजनितमातृप्रवृत्तेः स्वाभिप्रायरूपप्रवर्तना
ज्ञानजन्यत्वावधारणात् स विधिवाक्यश्रवणसमनंतरभाविनीं प्रयोज्यवृद्धप्र
वृत्तिमुपलभ्य तत्कारणत्वेन तस्य प्रवर्तनाज्ञानमनुमिमीते यद्यपि भोजनादौ स्वप्र
वृत्तेः समीहितसाधनताज्ञानपूर्वकत्वावधारणात् प्रयोज्यवृद्धप्रवृत्तेरपि तत्पूर्वकत

ॐ ५४ ९७

त्वायवसानं संक्रान्तस्याप्यन्येऽपि प्रेरितप्रवृत्तौ प्रवर्त्तनानाज्ञानजन्यत्वरूपो न मात्प्रवृत्तौ द
र्शनेन प्रयोऽर्थप्रवृत्तेरपि अन्ये प्रेरितप्रवृत्तिनिवानकारणत्वेन वर्त्तमानाज्ञानस्यैवाध्य
वसान तत्र प्रवर्त्तनाज्ञानमन्वयव्यतिरेकाभ्यां प्रयोजकवाक्यजन्यमित्येवधारयन्ति
तत्र चावापोद्वापाभ्यां प्रवर्त्तनायां विधिशक्तिमवधारयन्ति प्रवृत्तावन्तरङ्गो व्यापारः
प्रवर्त्तना सच व्यापारः प्रेरणादिरूपो विविध इति प्रत्येकं व्यभिचारित्वाद्विधिशाब्द्वा
च्यत्वानुपपत्तेः प्रवर्त्तनासामान्यमेव विधिशब्दवाच्यमिति कल्पयन्ति एवं च वि
धिश्रवणे प्रेषादिरूप एव तत्राभिप्रायस्य प्रवर्त्तनात्वेनैव रूपेण प्रतीतिर्न विशेष
रूपेण तथैव शक्तिग्रहात् विशेषरूपेण तु प्रतीतिर्लक्षणयैव एवं वैदिके लिङा
दिश्रवणेऽपि प्रवर्त्तनासामान्यमेव प्रतीयते तत्र कोऽसौ व्यापार इत्यपेक्षायां प्रेषादि
रूपस्य वक्त्रभिप्रायस्यापौरुषेये वेदे अनुपपत्तेः शाब्द निष्ठ एव प्रेरणापरपर्यायः
कश्चिद्व्यापार इति कल्प्यते अतश्च शाब्द निष्ठ एव प्रेरणापरपर्यायो व्यापारः शा
ब्दी भावना सैव च प्रवर्त्तनात्वेन रूपेण विध्यर्थ इति अयमेव चार्थोऽभिधाभावना

५४